मुवाच-कावै विश्व इति। काः कैधातोरादौ वेदान् कायतीति व्युत्पत्त्या सोमपावद्रूपं का इति, हंस-हंसेत्यजपामन्त्रोच्चारणहेतुत्वाच्च "यस्माच्छन्दांसि जज्ञिरे" इति श्रुतेश्च। तृतीयारण्यके आत्मखे द्वे का-शब्दपर्यायौ। द्रष्टेति तत्पदार्थप्रतिपादकश्रुतेश्च, वै स एव तैत्तिरीये "अभिसंविशती"ति श्रुतेः। विशतीत्यसौ विश्वः, गन्धर्वप्रश्ने मोक्षधर्मे प्रसिद्धत्वात्। कस्मिन्वेद्य इति चेत्-क्यभावे, का संशयकस्य जीवभूता प्रकृतिः-की, तस्या अभावे अदर्शने, स ईश्वरो वेद्यः विद्योपाधिकत्वात्; आवरण-भङ्गहेतुविज्ञानेनेत्यर्थः। कः काथात् अन्या तु अनिर्वाच्यापि प्रातिभासिकख्यातित्वात् अन्येति निर्देशः, सा की य इति पुंलिङ्गभयलक्षणार्थं कशब्देन वाच्यः, "द्वितीयाद्वै भयं भवती"तिश्रुतेः। का निरतिशयकृत्य-

---

हेतु होने से भी 'का' यह विश्व का अपर पर्याय है, जिससे छन्दों-वेदों की उत्पत्ति हुई--इस श्रुति के अनुसार तृतीय आरण्यक में आत्मा और आकाश ये दोनों शब्द पर्याय हैं, द्रष्टा होने से तत्-पदार्थ का प्रतिपादन करने वाली श्रुति का समन्वय होता है, तैत्तिरीय में वही है 'अभिसंविशति' यह श्रुति भी इसी का समर्थन करती है। जो प्रविष्ट करता है--वह विश्व है, यह गन्धर्व प्रश्न मोक्ष धर्म में प्रसिद्ध है। किस वेदन योग्य में इसके उत्तर में--क्य भाव में कहा गया है, का शंका करने वाले की जीवभूत प्रकृति भी है, उसके अभाव अर्थात् अदर्शन में वह ईश्वर वेद्य है, क्योंकि विद्या-रूपी उपाधि से संवलित है। आवरण भङ्गसाधन विज्ञान होने से, कौन ? काथ से 'अन्या तु' अनिर्वाच्य होने पर भी प्रातिभासिक ख्याति स्वरूप होनें से, अन्या यह निर्देश किया गया है। वह की जो इस पुल्लिङ्ग भयलक्षण अर्थ से क शब्द से वाच्य है, द्वितीय से भय होता है--यह श्रुति होने से, 'का' यह निरतिशय सर्वज्ञत्व रूप

नुग्रहसर्वज्ञत्वोपाधिः विद्यारोपितत्वात्, की परतन्त्रानुग्राह्यकिञ्चिज्ज्ञत्वोपाधिः अविद्यारोपितत्वात्। का क्यौ का च की च उपाधिकृत्यशवले ते द्वे यत्र लुप्ते, कुत्र चेत्? योगिलक्ष्ये। योगश्चित्तवृत्तिनिरोधः। प्रमाणविपर्ययविकल्पनिद्रास्मृतय इति पातञ्जलसूत्रबोधितचित्तवृत्तीनां निःशेषलयो योगोऽयम्। विकल्पः यस्यात्मनि न स योगी तेन महावाक्यश्रवणमननिदिध्यासनजन्यात्मज्ञानेन वृत्तिरोधाभ्यासः, क्व इति लक्षणत्यागेन न लक्षितं तस्मिन्परब्रह्मणीत्यर्थः। तत् तत्पदलक्ष्यं न तु तत्पदवाच्यं शवलं निर्धर्मकत्वात्। शक्तिग्रहाभावाच्च शुद्धं जहल्लक्षणया तत्पदवाच्यत्यागः, अजहल्लक्षणया निर्धर्मत्वाच्छक्तिग्रहाभावेऽपि वाच्यव्यावृत्तिमात्रत्यागः, तत्पद-

---

उपाधि है, विद्या में आरोपित होने से 'की' परतन्त्र अनुग्राह्य किञ्चिद् ज्ञत्व उपाधि है, सविद्या आरोपित होने से। 'काक्यै' का उभय की उपाधि के कारण शवल से ये दो जहाँ लुप्त हो जाते हैं, वह कहाँ होता है? योगियों के लक्ष्य में, चित्तवृत्ति का निरोध योग है, प्रमाण, विपर्यय, विकल्प निद्रा और स्मृति इस पतञ्जलि के सूत्र से बोधित चित्तवृत्तियों का निःशेष लय ही यह योग है। विकल्प जिस आत्मा में नहीं रहता है--वह योगी है, अतः, महावाक्य के श्रवण, मनन और निदिध्यासन से उत्पन्न आत्मज्ञान से वृत्ति का निरोध अभ्यास है, क्व से कहाँ इस लक्षण का त्याग होने से जो लक्षित नहीं है उस परब्रह्म में, तत् इस पद से वाच्य अर्थ विवक्षित नहीं है, अपितु लक्ष्य अर्थ विवक्षित है, क्योंकि, शवल ही वाच्य होता है, क्योंकि, निर्धर्मक होने से, लक्ष्य ही है।

शक्ति ग्रह का अभाव होने से शुद्ध जहत् लक्षणा से तत्पद के वाच्य का त्याग होता है। अजहत् लक्षणा से निर्धर्म होने से शक्तिग्रह का अभाव होने पर भी वाच्य व्यावृत्ति मात्र का त्याग है,

लक्ष्याङ्गीकारः। अत एव जहदजहल्लक्षणया लक्षितं तत् त्वम् असीत्यर्थः। सुखदुःखशोच्यपरतन्त्रकर्तृभोक्तृत्वादि त्वं नासीत्यर्थः। अविद्यारोपितत्वात् तत्पदार्थवत्त्वं पदवाच्यं त्यक्त्वा लक्ष्यं गृहीत्वाऽखण्डवाक्यार्थः। "त्वमेव प्रत्यक्षं ब्रह्मासी" ति श्रुत्या प्रमेयत्वप्रदर्शितत्वाच्च। एवकारार्थे तुशब्दः। एकः असि पदार्थकः। द्वितीयवृत्तित्यागेन सन्मात्रं भवति "यतो वाचो निवर्तन्ते अप्राप्य मनसा सहे" ति तैत्तिरीयश्रुत्या शक्तिग्रहस्य निवारितत्वात् उक्तलक्षणयैव वाक्यार्थः न तु शक्तिग्रहेण परिभाषाकारैस्त्ववैदिकानां वेदान्यशास्त्रदग्धानां जयार्थं शक्त्या स्वीकृतः, तत्त्वात्मबोधार्थमशक्यत्वात्। "एकस्मिन् विज्ञाते सर्वं विज्ञातमिति" श्रुतेः। अस्ति भाति प्रियत्वेन

अजहत् लक्षणा से निर्धर्म होने से शक्तिग्रह का अभाव होने से वाच्य व्यावृत्ति मात्र त्याग है, अतः, तत्पद का लक्ष्य स्वीकार किया है। इसलिए जहत्-अजहत् लक्षणा से लक्षित तत् = वह तुम हो--यह अर्थ होता है। सुख, दुःख, शोच्य, परतन्त्र, कर्तृत्व भोक्तृत्व आदि तुम नहीं हो--यह अर्थ है। अविद्या आरोपित होने से तत्पदार्थवत्त्व पद के वाच्य का परित्याग कर लक्ष्य को ग्रहण कर अखण्ड वाक्यार्थ होता है। 'तुम ही प्रत्यक्ष ब्रह्म हो' इस श्रुति के द्वारा प्रमेयत्व प्रदर्शित होने से, तु शब्द एवकार अर्थ में है, एक हो--पदार्थ को कहता है। द्वितीय वृत्ति का त्याग होने सत्‌रूप अर्थ अवगत होता है मन से अप्राप्त होने से जहाँ वाणी निवृत्त होती है, इस तैत्तिरीय श्रुति से शक्तिग्रह का निवारण होता है। जहत् अजहत् लक्षणा से ही वाक्यार्थ अवगत होता है, शक्तिग्रह से नहीं होता है। परिभाषाकार ने अवैदिक वेद से अन्य शास्त्रों से दग्धों के जय के लिए शक्ति के द्वारा स्वीकृत है, तत् यह आत्मबोधार्थक नहीं हो सकता है, अशक्य होने से। एक के जानने से सभी विज्ञात होते हैं--इस श्रुति से,

काथवेत्ता ईशजीवोपाध्यात्मकपदार्थमात्रस्य सत्ताऽभिन्नत्वेन वेत्ता ज्ञातेत्यर्थः। आत्मज्ञानवृत्तिलये विदेहमुक्तो वसिष्ठोऽसीत्यर्थः "केन कं पश्येदि" त्यादिश्रुतिभ्यः ॥५॥

काशब्दोऽयं वाच्यकायी हृदिस्थ-
स्तस्यावासं कायमाहुर्मुनीन्द्राः।
तदुभयं कायिकायौ च काथौ
तत्त्वन्त्वेकः काथवेत्ताऽवशिष्टः ॥ ६ ॥

अस्मिन् श्लोके काथ इति कायिकायशब्दाभ्यां स्पष्टं व्याकरोति। काशब्दोयमिति वाच्यकायीतिव्युत्पत्त्या उल्लेखत्वेनायं काशब्दः कायिनः वाचक इत्यर्थः। वाच्यः प्रतिपाद्यश्चासौ कायी यन्त्रारूढः भूतभ्रामक ईश्वरः

अस्ति = सत्ता, भाति = भान, प्रियत्व = आनन्द से काथ का ज्ञाता, ईश और जीव उपाध्यात्मक सभी पदार्थ सत्ता से अभिन्न होने से वेत्ता अर्थात् ज्ञाता है--यह अर्थ होता है। आत्मज्ञान वृत्ति के लय होने पर विदेह मुक्त अवशिष्ट हो--यह अर्थ है, किससे किसको देखेगा–इत्यादि श्रुतियों से यह अर्थ होता है ॥ ५ ॥

यह क शब्द वाच्य क हृदयस्थ कायी है, उसके आवास को मुनीन्द्रों ने काय को कहा है, कायी और काय ये दोनों काथ हैं, एक तत्त्व काथवेत्ता ही अवशिष्ट रहता है ॥ ६ ॥

इस श्लोक में काथ शब्द कायी और काय शब्दों से स्पष्ट व्याकृत है। यह का शब्द वाच्य कायी इस व्युत्पत्ति से उल्लिखित होता है, अतः यह का शब्द कायी का वाचक है। वाच्य प्रतिपाद्य यह कायी यन्त्रारूढ़ भूतभ्रामक ईश्वर हृदय में अंगुष्ठ परिमित काय में प्रतीयमान होने से व्यापक होते हुए भी हृदय में स्थित होने से, हे अर्जुन! यन्त्रारूढ़ सभी प्राणियों को अपनी माया से प्रेरित करता हुआ सभी प्राणियों के हृदय स्थल में ईश्वर अवस्थित रहता है--यह कहा है।

हृद्यङ्गुष्ठमात्रा च काये प्रतीयमानत्वाद् व्यापकोऽपि हृदिस्थः हृदये स्थितत्वात् ।

"ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन ! तिष्ठति ।

भ्रामयन्सर्वभूतानि यन्त्रारूढ़ानि मायये"ति ॥

भगवदुक्तेः ।

तस्येश्वरस्य भोक्तृत्वद्रष्टृत्वेन आवासम् आ समन्ताद्वासो यस्मिन् तं पिप्पलाय मौनत्वात् तत्किमितिचेत् कार्यं शरीरं तत्त्वं सङ्घातक्षेत्रं सजीवमिति मुनीन्द्राः व्यासादयो मुनीश्वरास्तमाहुः । "ऊर्ध्वमूलमधः शाखमश्वत्थ" मिति श्रुतिभगवदुक्तिभ्याश्च तत्तस्माद्भयलक्षणोऽयं सुखदुःखभोगहेतुकत्वेन प्रसिद्धत्वात् । थः—क्षेत्रशवलो जीवः वाच्यः न तु लक्ष्यः, सतत्त्वातिरिक्तकेवलक्षैत्रस्यासत्त्वात् । कायिकायौ—कायाधिकरणः कायी च कायोऽस्यातः कायः, तावेव कायौ पर्यायत्वेन काथशब्दार्थकावित्यर्थः । न तु लक्ष्यौ प्रातिभासिक-

---

उस ईश्वर का भोक्तृत्व और द्रष्टृत्व रूप से आवास अर्थात् सर्वत्र वास है, जिसका उसको पिप्पल के प्रति मौन रूप से वह कौन-सा पदार्थ है इस आशङ्का के उत्तर में कार्य शरीर तत्त्व सङ्घात क्षेत्र सजीव है——मुनिवर व्यासादि मुनिश्रेष्ठ ने उनको कहा है। ऊपर मूल है नीचे शाखाबाला अश्वत्थ है। इस श्रुति और भगवान् की उक्ति के आधार पर वह है। अतः भयस्वरूप यह सुख-दुःख भोग साधन के रूप में प्रसिद्ध है। 'थ' शब्द का वाच्य क्षेत्र शवल जीव है, यह लक्ष्य नहीं है, क्योंकि, सतत्त्व से अतिरिक्त केवल क्षेत्र नहीं रह सकता है। कायिकायौ = काय का अधिकरण कायी और काय इसका है, अतः काय है, ये दोनों कायी और काय ही काथ शब्द के अर्थ हैं——यह आशय है। प्रातिभासिक और व्यावहारिक लक्ष्यस्वरूप

व्यावहारिकोपाधिस्थितसन्मात्रैक्यत्वादेकस्तत्त्वमिति । लक्षितार्थत्वेन काथयोर्वेत्ता "नाऽसतो विद्यते भाव" इति भगवदुक्तत्वात् । शुक्तिसत्त्वाभिन्नप्रातिभासिक-रजतमिदमिव वेत्तृत्वात् । स्वप्नदृष्टदर्शनवृत्तिर्जाग्रद्वृत्त्या निरस्तेव तन्निरस्तवेद्ये अवशिष्टः उर्वरितस्त्वमसीत्यन्वयः अनिर्देश्यत्वात् ॥ ६ ॥

नाहं काच्यौ तौ क्षरौ चाक्षरौ भो !
ज्ञात्वा ज्ञाता चैक्यलिङ्गं त्यज त्वम् ।
वाच्ये त्यक्त्वा लक्ष्ययोरैक्यशुद्धं-
तत्त्वन्त्वेकः काथवेत्ताऽवशिष्टः ॥ ७ ॥

केनाभ्यासेन कथं किं प्राप्यमिति चेदित्थं नाहमिति-

उपाधि में स्थित सत् स्वरूप की एकता के आधार पर एक ही तत्त्व है। क्योंकि, काथ को जानने वाला लक्षित अर्थ के रूप में ना भाव अर्थात् सत् असत् नहीं है इस रूप में गीता में भगवान् के द्वारा कहा गया है, क्योंकि शुक्ति के सत्त्व से अभिन्न प्रातिभासिक रजत यह है के समान ये ज्ञातृता है। स्वप्न दृष्ट दर्शन वृत्ति जागरण वृत्ति से निरस्त हो जाती है उसी तरह उससे निरस्त केवल ज्ञातृत्व रूप में अवशिष्ट तत्त्व तुम हो--यही शेष रहता है--इस प्रकार अन्वय है अनिर्देश्य होने से ॥ ६ ॥

मैं क्षर और अक्षर जड़ एवम् अध्यस्त स्वरूप का और क्य का वाच्य नहीं हूँ, क्योंकि, अनिर्देश्य शुद्ध और लक्ष्य की ऐक्यरूपता ही उसका स्वरूप है। ज्ञानकर ज्ञाता स्वयं प्रसिद्धि, प्रवृत्ति स्थिति शील स्वरूप प्रधान सद् जिससे अवगत होता है उसको छोड़ दो। वाच्यों का परित्याग कर एक शुद्ध लक्ष्यात्मक एक तत्त्व काथ-वेत्ता ही अवशिष्ट रहता है ॥ ७ ॥

किस अभ्यास से कैसे क्या प्राप्य है--इस आशङ्का के उत्तर में

तौ उक्तद्रव्यौ काक्यौ वाच्यौ जडावध्यस्तावुपाधिस्वरूपौ अहं न अनिर्देश्यशुद्धलक्ष्यैक्यतत्स्वरूपत्वात् इत्यभ्यासेन तावुपाधी, पुनः किंलक्षणौ ? क्षरौ विकृतित्वेन क्षरन्ताविति क्षरधर्मिणौ विद्याऽविद्याकार्यत्वात् चैत्यपरम्, अक्षरौ नित्यमुक्तजीवन्मुक्तावस्थोपाधिकूटस्थावक्षरधर्मिणौ केवलकारणोपाधिकत्वात्। स्वाश्रयस्वविषयत्वात् स्वज्ञानेन ज्ञात्वा ज्ञाता स्वयं भो शिष्य ! त्वं चैक्य-लिङ्गं त्यज, सदिति प्रधानं लिङ्ग्यते ज्ञायते येन तत् प्रख्याप्रवृत्तिस्थितिशीलात्मकं लिङ्गं जहीत्यर्थः। अनिर्वचनीयदर्शनत्वेन "चूडालाख्याने" वाशिष्ठे चित्तत्यागोक्तत्वात् चित्तप्रवर्तकप्रवर्त्यत्वे वाच्ये शबले त्यक्त्वा शुद्धनिर्धर्मकचिन्मात्रलक्ष्ययोः ऐक्यं निरस्त-

---

इस प्रकार का मैं नहीं हूँ--यही इस पद्य के द्वारा कहा गया है। वे पूर्वोक्त का और क्य का वाच्य जड़ और अध्यस्त उपाधि स्वरूप है, अहं नहीं है, क्योंकि अनिर्देश्य शुद्ध बुद्ध लक्ष्यस्वरूप ऐक्य स्वरूप होने से--इस अभ्यास के कारण हैं। दोनों उपाधियों का क्या स्वरूप है ? विकृति रूप से क्षर है क्षर धर्मी है, विद्या और अविद्या का कार्य होने से। च यह अपर स्वरूप का बोधक है, अक्षर स्वरूप वाले अर्थात् नित्यमुक्त और जीवन्मुक्त रूप अवस्था रूप उपाधि से युक्त अक्षर धर्मी, केवल कारणस्वरूप उपाधि होने से। ज्ञान का आश्रय और ज्ञान का विषय होने से, हे शिष्य ! अपने ज्ञान से उसको जानकर स्वयं ज्ञाता हो जाओ। तुम ज्ञान स्वरूप होकर लिङ्ग का परित्याग करो, सत् यह प्रधान लिङ्ग अर्थात् ज्ञान जिससे होता है वह प्रख्या = नाम, प्रवृत्ति स्थिति और शीलस्वरूप लिङ्ग का परित्याग करो--यह अर्थ है। अनिर्वचनीय दर्शनत्व से वाशिष्ठ रामायण के "चूडाल" आख्यान में चित्त के त्याग की कथा कही गई है, चित्त प्रवर्तक प्रवर्त्यत्व रूप वाच्य में शबल का परित्याग कर शुद्ध निर्द्धर्मक

संख्याक्रम्, तच्च शुद्धमित्थं तत्त्वं तत्स्वरूपस्त्वमसि, वाच्यं नासीत्यर्थः। त्विति निश्चयेन। तत्स्वरूपेण एकः न द्वितीयः। काथवेत्ता त्वं कथमिति चेत्? विकल्पित-वेत्तृत्वात् काथवेत्तासि, तदभावेऽवशिष्ट इत्यर्थः ॥ ७ ॥

लोकालोकौ यस्य सिद्ध्या प्रलुप्तौ
शीतोष्णे ते सप्रभे द्वे प्रलीने।
आ आद्यन्तौ साभिमानौ प्रणष्टौ
तत्त्वन्त्वेकः काथवेत्ताऽवशिष्टः ॥ ८ ॥

एतादृशविशिष्टानुभवे केन कारणेन किं लुप्तमिति चेदाह—लोकालोकाविति। लोक्यते चक्षुःप्रधानेन्द्रियैः प्रत्यक्षेणासौ लोकः, सविशेषव्यक्तात्मकत्वात्। तैर-प्रत्यक्षत्वान्नालोक्यते असौ अलोकः, अविशेषलिङ्गा-

---

चिन्मात्र लक्ष्यों में संख्याशून्य एकत्व है, और वह शुद्ध यह तत्त्वं तत् = शुद्ध स्वरूप तुम हो, तुम वाच्य नहीं हो--यह अर्थ है, तु का अर्थ निश्चय है, तत् अर्थात् शुद्ध स्वरूप से एक है द्वितीय नहीं है। ऐसी स्थिति में तुम काथ के वेत्ता किस प्रकार हो? विकल्पित ज्ञाता होने से काथ के वेत्ता हो, उसके अभाव में अवशिष्ट हो--यह अर्थ है ॥ ७ ॥

जिसकी सिद्धि से लोक और अलोक प्रलुप्त हो जाता है। शीतोष्ण प्रभा के साथ विनष्ट हो जाता है। आद्यन्त अभिमान के साथ विनष्ट हो जाते हैं, काथ वेत्ता वह शुद्ध तुम बच जाते हो ॥८॥

इस प्रकार के विशिष्ट अनुभव में किस कारण से क्या लुप्त होता है--इस आशङ्का के प्रसङ्ग में "लोकालोक" यह कहा है। चक्षुः आदि प्रधान इन्द्रियों से जो देखा जाता है--वही लोक है, सविशेष व्यक्त आत्मस्वरूप होने से। उन इन्द्रियों से अप्रत्यक्ष होने से जो नहीं दिखाई देता है--वह अलोक है, अविशेष लिङ्ग

लिङ्गात्मकव्यक्तिशून्यत्वात्। लोकश्च अलोकश्च तौ, अथ वा "सच्च त्यच्चाभवदि"ति काठकश्रुतिबोधितौ। सदिति भूम्यप्तेजांसि दित्यदितिबाह्याकारोऽचाक्षुषप्रत्यक्षाप्रत्यक्षौ। यस्य "अक्षरं ब्रह्म परममि"ति भगवद्बोधितस्याक्षरस्य सिद्ध्या गुरुशास्त्रात्मप्रत्ययप्राप्त्या प्रलुप्तौ आत्यन्तिकज्ञानप्रलयङ्गतौ। इमे उल्लेखत्वात् सर्वभूतप्रत्यक्षविषये शीतोष्णे द्वे कफपित्तात्मकचन्द्रसूर्यस्वरूपे, श्वेतारक्तप्रभाभ्यां सप्रभे हृन्नाभियोगिप्रत्यक्षे प्रलीने निर्बीजसमाधौ प्रलयङ्गते इत्यर्थः। न तु निद्रामरणादेः सबीजानां पुनर्भवात्। "भवप्रत्ययः प्रकृतिलयानामि"ति पातञ्जलोक्तेः। आ आद्यन्तौ—आमहाभूतब्रह्मादिपि-

---

=सम्भव अर्थात् उत्पत्ति और प्रलय ये दोनों। साभिमान अर्थात् अलिङ्गस्वरूप व्यक्ति शून्य होने से। लोक और अलोक लोकालोकौ। अथवा सत् और वह होता है--काठक उपनिषद् से वे दोनों ज्ञात है। भूमि, जल और तेज, दिति और अदिति यह सत् है जो बाह्याकार अचक्षु से प्रत्यक्ष और अप्रत्यक्ष है। अर्थात् पृथिवी, जल और तेज प्रत्यक्ष है एवं दिति और अदिति अप्रत्यक्ष है।

जिसका "अक्षर स्वरूप परम् ब्रह्म है" यह भगवान् से बोधित अक्षर की सिद्धि होने से गुरुशास्त्र और आत्मज्ञान से प्राप्त होने से दोनों प्रलुप्त होकर आत्यन्तिक ज्ञान प्रत्यय अवस्था को प्राप्त होते हैं। ये उल्लिखित होने से सभी प्राणियों के द्वारा प्रत्यक्ष विषय शीत और उष्ण ये दो कफ और पित्त स्वरूप चन्द्र और सूर्य स्वरूप श्वेत एवं आरक्त प्रभाओं से दीप्ति सम्पन्न हृदयनाभि में योगियों से प्रत्यक्ष प्रलीन निर्बीज समाधि में प्रलय अवस्था प्राप्त होते हैं--यह अर्थ है। निद्रा और मरणादि की अवस्था नहीं है, क्योंकि, सभी बीजों की पुनः उत्पत्ति होने से। भव प्रत्यय प्रकृतिलय वालों के लिए कहा है--ऐसा पतञ्जलि ने कहा है। आ आदि से अन्त तक अर्थात् महाभूत से लेकर ब्रह्मादि पिपीलिका तक भूतवर्गों का आदि अजस्र

पीलिकान्तानां भूतानामादिः अजस्रं सम्भवः, अन्तः प्रलयश्च तौ। साभिमानौ—उत्पन्नोऽस्मि, मृतोऽस्मीत्यभिमानाभ्यां संहतौ यथा रज्जुसर्पौ रज्जुज्ञानेन नष्ट इव प्रणष्टौ अपुनर्भवङ्गतावित्यर्थः। "उत्पत्तिस्थितिलयतिरोधानधर्मवर्जितं कैवल्यं तस्य तदिति नामे"ति श्रुतेः। तत् त्वं जीवश्वेरोपाधिद्वितीयशून्यत्वेन एकः अद्वितीयः, सर्वकारणकार्यकाथोपाधिसाक्षित्वात् तदारोपितवेत्तृत्वाच्च। काथवेत्ता तत्स्वरूपभूतत्वेन गलितवेत्तृत्वेऽवशिष्टः उर्वरित इत्यर्थः ॥ ८ ॥

भूरापोऽग्निर्वायुखे मानसन्त-
दबुद्ध्यात्मा वै षोडशान्ये विकाराः।
शुद्धस्त्वं यः प्राकृतः पञ्चविंश-
स्तत्त्वन्त्वेकः काथवेत्ताऽवशिष्टः ॥ ९ ॥

उत्पन्न हुआ हूँ, मरगया हूँ इस अभिमान से सम्पन्न होकर जैसे रस्सी में सर्प भ्रम रस्सी के ज्ञान से नष्ट के समान सर्वथा नष्ट होकर पुनः उत्पन्न नहीं होते हैं--यह आशय है। उत्पत्ति, स्थिति, लय, तिरोधान धर्म से शून्य ही कैवल्य है। उसकी यह संज्ञा है--ऐसा श्रुति में कहा गया है। वह तुम जीव और ईश्वर उभय उपाधि से शून्य होने से एक अद्वितीय सभी कारण-कार्य-रूप काथ उपाधि का साक्षी और उसकी उपाधि का ज्ञाता होता है। काथ का ज्ञाता उसका स्वरूप भूत होने से ज्ञातृत्व के विनष्ट होने से अद्वितीय शुद्ध ही शेष में रहता है ॥ ८ ॥

पृथिवी, जल, अग्नि, वायु और आकाश, मन, अहङ्कार, बुद्धि, आत्मा एवम् अन्य सोलह विकार हैं, तुम एकमात्र शुद्ध पचीसवे तत्त्व हो चौबीस प्राकृत है, इस प्रकार काथ वेत्ता यही एकमात्र तत्त्व अवशिष्ट रहता है ॥ ९ ॥

श्लोकेऽस्मिन् क्षेत्रस्वरूपः क्षेत्राधिकरणकः क्षेत्रनियन्ता शुद्ध इति चतुःसंज्ञाभिराह–भूरापोऽग्निरिति। भूर्गन्धगुणा, रसरूपस्पर्शशब्दगुणा अपि स्यात् आकाशादिचतुर्विधभूतकार्यत्वात्। अग्निः रूपगुणः, स्पर्शशब्दगुणोऽपि भवति, खादिद्विविधभूतकार्यत्वात्। वायुः स्पर्शगुणः शब्दगुणश्च आकाशकार्यत्वात्। खं शब्दैकगुणं "तस्मादात्मन आकाशः सम्भूत" इति श्रुतेः। वायुश्च खश्च वायुखे, सङ्कल्पविकल्पात्मकं मानसम्, तत् कारणमहङ्कारः, अहङ्कारकारणं महत्, अध्यवसायात्मिका बुद्धिः, प्रत्यक्षानुमानोपमानानुपलब्ध्यर्थापत्तिशब्दात्मकषट्प्रमाणजन्यवृत्तिका प्रमारूपचैतन्याभिव्यञ्जकत्वात्। निरावरणा समष्टिः आत्मा। षोडशविकृतोस्सप्तप्रकृतीरतीत्यात्मा जीवभूता प्रकृतिः। इत्यष्टधा प्रकृतिः

इस पद्य में क्षेत्रस्वरूप, क्षेत्राधिकरणक, क्षेत्रनियन्ता, शुद्ध इन चार संज्ञाओं से कहा गया है––पृथिवी, जल, अग्नि गन्ध गुणवाली, रस, स्पर्श और शब्द गुणवाली भी है। आकाश आदि चार प्रकार के भूतपदार्थ का कार्य होने से। अग्नि रूप गुणवाली और स्पर्श शब्द गुणवाली भी होती है, आकाश आदि दो प्रकार के भूत का कार्य होने से। वायु स्पर्श और शब्द गुणवाला है, आकाश का कार्य होने से। आकाश का एकमात्र शब्द ही गुण है, क्योंकि, उस आत्मा से आकाश उत्पन्न हुआ––यह श्रुति में कहा गया है वायु और ख = आकाश वायु-खे, सङ्कल्प विकल्पात्मक मानस है उसका कारण अहङ्कार है, अहङ्कार का कारण महत् है, अध्यवसायात्मक बुद्धि है, वह प्रत्यक्ष, अनुमान, उपमान, अनुपलब्धि, अर्थापत्ति, शब्दस्वरूप छः प्रमाणजन्य वृत्ति वाली है, प्रमारूप चैतन्य से अभिव्यञ्जक होने से। आवरणरहित समष्टि आत्मा है। सोलह प्रकृतियों और सात प्रकृतियों से परे आत्मा जीवभूत प्रकृति है। आठ प्रकार की

तस्या अन्ये विकाराः षोडशसंख्याकाः। का इति चेत् घ्राणरसनचक्षुस्त्वक्छ्रोत्रमिति बुद्धीन्द्रियाणि, पायूपस्थ-पादहस्तवागिति कर्मेन्द्रियाणि पञ्च, गन्धरसरूपस्पर्श-शब्द इति पञ्चतन्मात्राण्येवं पञ्चदश कार्यरूपं मनश्चेति षोडश, तत्र त्रयोविंशतितत्त्वलक्षणकार्यस्य चतुर्विंशम-व्यक्तं तद्भावः प्राकृतः। "सा सत्ता सा महानात्मा तामाहुस्त्वतलादय" इति व्याकरणहरिकारिकोक्तेः स एव जीवः। सविवेकेन तद्भिन्नत्वेन पञ्चविंशः समष्टिः त्वं सर्वक्षेत्रेषु क्षेत्रज्ञः, यः शुद्धो वासुदेवस्तत्पदार्थलक्ष्यकः। तेनैकः क्षेत्रक्षेत्रज्ञयोः काथयोर्ज्ञाता ज्ञानस्वरूपश्च। तद-भावेऽवशिष्टोऽसीति विद्धीत्यर्थः।

यद्वा, व्यक्ताव्यक्ताद्रहितो यः शुद्धः अनिर्देश्यः। न तु वाच्यः जडदुःखशान्तिव्यावृत्त्या वेदप्रतिपाद्य-

---

प्रकृति है, उस प्रकृति के अन्य सोलह संख्या वाले विकार हैं। वे सोलह कौन हैं--घ्राण, रसन, चक्षु, त्वक्, श्रोत्र, ज्ञान इन्द्रियाँ हैं, पायु, उपस्थ पाद, हाथ, वाणी ये पाँच कर्म इन्द्रियाँ हैं। गन्ध, रस, रूप स्पर्श, शब्द ये पञ्चतन्मात्रा हैं, इस प्रकार पन्द्रह कार्यरूप हैं और सोलहवाँ मन है, तेइस तत्त्वात्मक कार्य का चौबीस अव्यक्त हैं, उसका भाव प्राकृत है। वह सत्ता है, वह महान् आत्मा है, उन्हीं को त्वतल आदि प्रत्यय कहता है--यह व्याकरण की हरिकारिका में कहा जाता है, वही जीव है। विवेकपूर्वक उससे भिन्न पचीश की समष्टि है, तुम सभी क्षेत्रों में क्षेत्रज्ञ है, जो शुद्ध बासुदेव है वह तत्पदार्थ का लक्ष्य है। इसलिए, एक क्षेत्र और क्षेत्रज्ञ काथ का ज्ञाता और ज्ञानस्वरूप है। उसके अभाव में तुम अवशिष्ट हो—यह तुम जानो—यह अर्थ है।

अथवा व्यक्त और अव्यक्त से रहित जो शुद्ध है--वह अनिर्देश्य है, वह वाच्य नहीं है जड़, दुःख, शान्ति की व्यावृत्ति होने से—वेद से

त्वात् । तत्स्वरूपस्त्वं शुद्धोऽप्यज्ञानतः प्रकृतिभावस्व-रूपत्वात् प्राकृतः, प्रकृत्यधिकरणः अनिर्वाच्यप्रकृति-प्रातिभासिकसत्त्वरूपेण ग्राह्यत्वात् प्रकृतित्वाच्च । चतुर्विंशमिदं क्षतत्राणात् क्षयात् क्षरणात् क्षेत्रमिव क्षेत्रमिति ज्ञानेन विवर्त्तमयमिति क्षेत्रैक्यं तिरस्कृत्य क्षेत्रज्ञोऽहं पञ्चविंशः, क्षेत्रज्ञत्वपञ्चविंशत्यपरित्यागेन क्षेत्रक्षेत्रज्ञयोर्ज्ञाता वृत्तिस्वरूपं षड्विंशमहमिति विद्धीत्यर्थः । तेन षड्विंशतिसंख्या काथवेत्तृत्वात् । तदभावेऽवशिष्टः असीत्यर्थः ॥ ९ ॥

एतादृशं कथमनुभूतम्, गीतश्च कैरेवमनिर्देश्यविष-यत्वाच्चेन्मैवम् ।

द्रष्टा दृश्यं दर्शनं यत्र लुप्तं
सत्संवित्त्या योगिभिश्चानुभूतम् ।

प्रतिपाद्य होने से, तत्स्वरूप तुम शुद्ध होने पर भी अज्ञान से प्रकृति-भाव स्वरूप होने से प्राकृत हैं, प्रकृति अधिकरणक अनिर्वाच्य प्रकृति प्रातिभासिक सत्त्वरूप से ग्राह्य होने से एवं प्रकृति होने से । यह चौबीस नष्ट के रक्षण से नाश, क्षरण होने से क्षेत्र के समान क्षेत्र इस ज्ञान से विवर्त्तमय होने से क्षेत्र की एकता का तिरस्कार में पचीसवाँ क्षेत्रज्ञ है । पचीसवें क्षेत्रज्ञत्व का अपरित्याग करने से क्षेत्र और क्षेत्रज्ञ का ज्ञाता वृत्तिस्वरूप छब्बीसवाँ मैं हूँ यह जानो--यह अर्थ होता है । अतः, काथवेत्ता होने से छब्बीस संख्या है, उसके अभाव में अवशिष्ट रहता हैं ॥ ९ ॥

ऐसा अनुभव किस प्रकार किया और किसने इन विषयों का वर्णन किया, क्योंकि, यह विषय तो अनिर्देश्य है--इस आशङ्का के उत्तर में कहा जा रहा है :--

द्रष्टा, दृश्य और दर्शन जहाँ समाप्त हो जाता है सत् संवित्ति के द्वारा योगियों ने अनुभव किया है । वेद में इसको नेति नेति = यह

वेदे गीतं नेति नेतीति शब्दै-
स्तत्त्वन्त्वेकः काथवेत्ताऽवशिष्टः ॥ १० ॥

द्रष्टेति। "यदज्ञानादिदं भाती"ति श्रुतेः। आवरण-हेतुविक्षेपशक्त्यारोपितद्रष्टृत्वम्, प्रमातृचैतन्ये दृश्यं दृष्टमित्यनेन सुखी दुःख्यहमिति अनुभववृत्तित्वात् द्रष्टा। प्रमाणचैतन्ये दृश्यमिदमिति प्रमाणजन्यवृत्त्या-रोपितं दर्शनम्। प्रमेयचैतन्ये दृश्यमस्तीति भाववृत्त्या-रोपितत्वात् दृश्यं "यज्ज्ञानाद्विनिवर्तते" इत्याथर्वण-श्रुतेः। यथा रज्जुसर्पे रज्जुज्ञानादिवात्मज्ञानव्यावृत्तित्वेन "प्रज्ञानं ब्रह्मे"ति श्रुतिजन्यात्मज्ञानवृत्त्या लुप्तम् अत्य-न्तादर्शनं गतम्। यत्र यस्मिन्प्रकृष्टज्ञानमात्रस्वरूपे

नहीं, यह नहीं इन शब्दों से कहा गया है, काथ वेत्ता के रूप में अवशिष्ट एक वही तत्त्व है ॥ १० ॥

जिसके अज्ञान से यह भान होता है। इस श्रुति के अनुसार आवरण साधन और विक्षेप शक्ति से आरोपित द्रष्टृत्व, प्रमाता के चैतन्य में दृश्य को देखा इससे मैं सुखी हूँ, मैं दुःखी हूँ अनुभव वृत्ति के कारण द्रष्टा होता है। प्रमाण चैतन्य में दृश्य है भाववृत्ति आरोपित होने से दृश्य है प्रमाणजन्य वृत्ति से आरोपित ही दर्शन है। प्रमेय चैतन्य में दृश्य है इस भाववृत्ति से आरोपित होने से दृश्य है यह सिद्ध है, जो ज्ञान से विनिवृत्त होता है--यह अथर्ववेद में श्रुति में कहा गया है। जैसे रस्सी में सर्प का ज्ञान यह रस्सी के ज्ञान से वैसे ही आत्मज्ञान से व्यावृत्त दृश्य विनिवृत्त होता है, क्योंकि, प्रज्ञान ब्रह्म है, इस श्रुति से उत्पन्न आत्मज्ञान की वृत्ति से वह लुप्त होता है, सर्वथा उसका अदर्शन प्राप्त होता है। यत्र अर्थात् जहाँ = प्रकृष्ट ज्ञान रूप ब्रह्म में। वितर्क विचार आनन्द अस्मिता अनुगम विषय से दृश्य की निवृत्ति नहीं होती है, क्योंकि, वहाँ भेद-भाव का दर्शन रहता है। किन्तु यह जिज्ञास्य है, द्रष्टा आदि भेद से

ब्रह्मणि। न तु वितर्कविचारानन्दास्मितानुगमविषये भेदभावदर्शनत्वात्। तर्हि द्रष्टादिभेदशून्यकेन कैरनुभूतमितिचेत् आह–सत्संम्वित्त्या; "सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयमि"ति श्रुतिबोधितसदितिशून्यव्यावृत्त्याऽद्वितीयमित्यावरणविक्षेपस्वरूपाविद्ययैकत्वाद्यारोपित - तन्निवृत्तिप्रवृत्तिकृतिरूपद्वित्वमत्यन्तव्यावृत्त्या सन्मात्रमेवेति सत्संवृत्तिस्तया योगिभिः महावाक्यश्रवणमनननिदिध्यासननिरुद्धवृत्तिभिरनुभूतं तद्भूत्वा तदनुभवेनेत्यर्थः। न तु भणकैर्गीतमितिचेत्? वेदैः–ऋग्यजुःसामाथर्बणैः गीतं कीर्त्तितम्। नेति नेतीति शब्दैः "नेति नेतीतिगार्गी"ति बृहदारण्यकश्रुतेः। चैतन्यातिरिक्तं नेति नेतीत्यर्थः। नेतिमुखेन भावे मायाकार्ये च निरस्ते सर्व-

---

शून्य इस ज्ञान का किसने अनुभव किया है? इसके समाधान में कहा है सत्संवित्ति से अनुभव किया गया है। हे सोम्य! यह आगे सद्रूप ही था, एक था अद्वितीय था इस श्रुति से बोधित सत् के द्वारा शून्य की व्यावृत्ति से अद्वितीय यह आवरण विक्षेप स्वरूप अविद्या से एकत्वादि आरोपित दृश्य की निवृत्ति प्रवृत्ति कृति रूप द्वित्व की अत्यन्त व्यावृत्ति होने से सन्मात्र ही है, इस सत् की वृत्ति से योगियों ने महावाक्य का श्रवण मनन और निदिध्यासन से वृत्तिका निरोध कर यह अनुभव किया है, और इस अनुभव से तत्स्वरूप की प्राप्ति होती है। यह भाँड अर्थात् चाटुकार का गायन है––इस आशङ्का के समाधान में कहा गया है कि ऋग्वेद, यजुर्वेद, सामवेद और अथर्ववेद में यह कहा गया है। नेति, नेति यह नहीं, यह नहीं है गार्गी इन शब्दों से वृहदारण्यक श्रुति में कहा गया है, चैतन्य से अतिरिक्त कुछ नहीं है––यह तात्पर्य है। निषेध मुख माया और उसके कार्य की निवृत्ति होने पर सर्वज्ञान स्वरूप है––यह कहा जा सकता है, विक्षेप और आवरण भावरहित सन्मात्र स्वरूप तुम हो।

भानास्तीति वक्तुमशक्यत्वात्; विक्षेपावरणभावशून्यं सन्मात्रं त्वमसीत्यर्थः। न त्वनात्मा "त्वमेव प्रत्यक्षं ब्रह्मासी"ति श्रुत्युक्तत्वात्। तेनैकः श्रुत्युक्त एवकारेण ब्रह्मातिरिक्तद्वितीयनिरासादर्शितत्वाच्च। काथवेत्ताः किञ्चिज्ज्ञत्वनियन्तृत्वकाथोपाधिज्ञातृत्वात्। तन्निवृत्तौ अवशिष्ट इत्यर्थः॥ १०॥

अस्मद्युष्मद्वाच्यबाह्यान्तरे द्वे
स्थूलं सूक्ष्मं कारणं सच्चासच्च।
यस्मिन्नेव मायया कल्पितं वै
तत्त्वन्त्वेकः काथवेत्ताऽवशिष्टः॥ ११॥

अद्वैतब्रह्मणि केनेदं कल्पितमिति चेदाह—अस्मदिति। अस्मद्युष्मद्वाच्यबाह्यान्तरे "अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणी"तिश्रुतेः। देहाधिकरण-

---

आत्मा नहीं है यह नहीं कहा जा सकता है, क्योंकि 'तुम ही प्रत्यक्ष ब्रह्म हो' यह श्रुति में कहा गया है। एकत्व को कहने वाली श्रुति में कथित एक से ब्रह्म से अतिरिक्त द्वितीय का निरास होता है--यह प्रदर्शित किया गया है। काथ वेत्ता, किञ्चित् जानने वाला, नियन्ता, काथोपाधि ज्ञातृत्व होने से, उसकी निवृत्ति से ही अवशिष्ट रह जाता है॥ १०॥

अस्मत् शब्द और युष्मत् शब्द से वाच्य बाह्य और आभ्यन्तर इन दो, स्थूल सूक्ष्म और कारण सत् और असत् जिस ज्ञान स्वरूप ब्रह्म में कल्पित है--वही एक काथ वेत्ता तत्त्व अवशिष्ट है॥ ११॥

अद्वैत ब्रह्म में यह किस प्रकार कल्पित है--इस आशङ्का के समाधान में कहा गया है कि अस्मद् = अहम् और युष्मद् = त्वम् का वाच्य बाह्य और आभ्यन्तर है, क्योंकि, इस जीवस्वरूप आत्मा के

कमध्यात्मम् अस्मत्प्रत्ययवाच्यं प्रत्यग्वृत्त्याश्रयत्वात् क्षेत्रज्ञमित्यर्थः, अजामेकां लोहितशुक्लकृष्णामिति तेजोबन्नात्मकक्षेत्रत्वात्। युष्मत्प्रत्ययवाच्यं रूपाश्रयत्वात्। विषयविषयित्वाभ्यां बाह्यश्चान्तरश्चेति बाह्यान्तरे ते द्वे निर्दिष्टे। "इदं शरीरं कौन्तेय क्षेत्रमित्यभिधीयते। एतद्यो वेत्ति तं प्राहुः क्षेत्रज्ञ इति तद्विद"इतिभगवदुक्तेः, "सत्यश्चानृतश्चे"ति श्रुतिनिर्दिष्टत्वाच्च। इदं शरीरमित्युल्लेखितयुष्मत्प्रत्ययवाच्यस्य भेदत्रयमाह—स्थूलम्। त्रिवृत्तं करवाणीति श्रुतेस्त्रिवृत्करणं भूतकार्यं सविशेषत्वात्। "तस्मादात्मन आकाशः सम्भूत"इति तैत्तिरीयश्रुतेः पञ्चानामुत्पत्तिश्रवणात्। यथा जलमृन्मिश्रद्धिकरणकृते गृहे मठाकाशवायूष्मादि मठाधिकरणकत्वेन प्रतीय-

---

द्वारा अनुप्रविष्ट होकर, नाम और रूपात्मक विश्व को व्याकृत किया है—यह श्रुति में कहा गया है। देहाधिकरण अध्यात्म अस्मत् शब्द का वाच्य है, वह प्रत्यग् वृत्ति का आश्रय होने से क्षेत्रज्ञ है। क्योंकि, उत्पत्ति शून्य एक लोहित शुक्ल और कृष्ण तेज, जल और अन्नात्मक क्षेत्र है। क्योंकि युष्मत् प्रत्यय का वाच्य रूप का आश्रय है। विषय और विषयी के द्वारा वाच्य और आभ्यन्तर ये दो निर्दिष्ट है। हे अर्जुन! यह शरीर क्षेत्र कहा जाता है, इसको जो जानता है उसको क्षेत्रज्ञ कहा जाता है—यह भगवान् ने कहा है। सत्य और अनृत यह श्रुति में भी कहा गया है। इदं शरीरं शब्द के द्वारा निर्दिष्ट युष्मत् प्रत्यय वाच्य का तीन भेद कहा गया है। स्थूल, सूक्ष्म और कारण। त्रिवृत्तं करवाणि इस श्रुति के द्वारा त्रिवृत्करण भूतकार्य है—सविशेष होने से। क्योंकि उस आत्मा से आकाश उत्पन्न हुआ, इस तैत्तिरीय श्रुति के अनुसार पाँचो की उत्पत्ति कही गई है। जैसे जल और मिट्टी मिश्रित के विकरण भूत गृह में मठाकाश, वायु, उष्मा = तेज आदि मठाधिकरण के रूप में प्रतीति होती

मानत्वात् पञ्चीकृतश्रोत्रियानुवादाच्छ्रौतम्, न तु स्मार्तं पञ्चीकरणम्, पञ्चीकृतभूतकार्यविराट्शरीरमित्यर्थः। सूक्ष्ममपञ्चीकृतभूतकार्यत्वात् सहिरण्यगर्भलिङ्गश्चेत्यर्थः। कारणं–निरोधावरणशक्त्यात्मकप्रज्ञमलिङ्गत्वात्, शरीरद्वयसमवायहेतुत्वाच्च। एतेषां सदितिभाव सत्त्वम्। तु–इत्यपरेषामात्मन्यभावत्वमसत्। च समुच्चयार्थः। यस्मिन्मायाश्रये ब्रह्मणि अस्मद्युष्मत्प्रत्ययगोचरस्थूलसूक्ष्मकारणमित्युक्तपूर्वं सर्वम्। एवं सप्रकारकम्। मायया–अघटघटनपटुरूपया, स्वयमेव कल्पितपाषाणशालभञ्जिकेव। वै निश्चितं तत्त्वं नेदं सम्यग्दर्शनत्वात्, न शालभञ्जिकापाषाणाविति। द्वैतशून्यत्वात् एकः सङ्ख्यागुणरहितः। काथार्थकयोरुपाध्योः सत्ताया नातिरिक्तत्वेन वेत्ता ज्ञाता। ज्ञेयशून्यत्वादवशिष्ट इत्यर्थः।११।

है, पञ्चीकृत श्रुति के अनुवाद से श्रुत है। यह पञ्चीकरण प्रक्रिया स्मृति से उपलब्ध नहीं है। पञ्चीकृत भूतकार्य विराट् शरीर है। सूक्ष्म :––अपञ्चीकृत भूतकार्य होने से सहिरण्यगर्भ लिङ्ग है। कारण :––निरोध और आवरण शक्त्यात्मक प्राज्ञ है––अलिङ्ग होने से और पूर्वोक्त शरीरद्वय समवाय का हेतु होने से। इनकी सद्रूपता सत्त्व है। 'तु' यह अन्य का आत्मा में अभावत्व रूप असत्। च का अर्थ समुच्चय है। जिस माया के आश्रयभूत ब्रह्म में अस्मत् और युष्मत् प्रत्यय के विषय स्थूल, सूक्ष्म और कारण पूर्वोक्त सभी हैं। इसी प्रकार उसके सभो प्रकार हैं। मायया = अघटित घटनास्वरूप से, स्वयं ही कल्पित पत्थर की पुत्तली के समान। "वै" क्योंकि ये निश्चित तत्त्व नहीं है, सम्यग् दर्शन होने से शालभञ्जिका और पाषाण दो नहीं है। द्वैत शून्य होने से, एक अर्थात् संख्या और गुण से रहित काथ अर्थो की उपाधियों की सत्ता से अतिरिक्त कोई ज्ञाता नहीं है, ज्ञेय शून्य होने से वही अवशिष्ट है॥ ११॥

व्यक्ते दृश्यादृश्यधर्मेऽथ भावे
सन्मात्रन्त्वं स्वानुभूत्या भवेयम् ।
शून्यङ्कृत्वा शून्यमेतच्च चित्त्वा-
च्चिद्रूपं त्वं काथवेत्ताऽवशिष्टः ॥ १२ ॥

तर्हि कथमुत्पन्नसम्यग्विवेकिनाऽस्मिन्दृश्ये अभ्यसनीयमिति चेत्—व्यक्त इति। महाभौतिके सकारणे आत्मगोचरत्वाद्दृश्ये प्रमेयचैतन्ये। यथा खण्डायां सूदशिल्पनिमित्तनौकादिनानापदार्थमिव दृश्यं धर्मत्वम्, प्रमेयप्रमाणप्रमातृसत्तातिरिक्तत्वेन माभूत् ते तव मायानिमित्तत्वात् स्वानुभूत्या, "अन्यदेव तद्विदितादथो अविदितादधि" इतिश्रुतिबोधितस्त्वं तस्यानुभूतिः, विदितादविदितादन्यदेवेति, तया सन्मात्रमिदमनुभूतं तत्त्वं

प्रमेय चैतन्य स्वरूप दृश्य, अदृश्य धर्म एवं भाव में सद्रूपता त्वम् इस स्वानुभूति से होती है वास्तविक सत्यता नहीं है, शून्यता नहीं मानी जा सकती है, सभी भाव पदार्थों में यह नहीं, यह नहीं इस रूप में चिद्रूपता ही अवशिष्ट रहती है, त्वं चिद्रूप काथ वेत्ता अवशिष्ट रहता है ॥ १२ ॥

यह जिज्ञास्य है कि सम्यग् विवेक होने पर इस दृश्य जगत् को किस रूप में अवगत करना चाहिए ? इस आशङ्का के उत्तर में यह कहा गया है :—

कारण पूर्वक महाभौतिक में आतमरूप दृश्य चैतन्य के व्यक्त होने पर जैसे बढ़ई के द्वारा निर्मित नौका का खण्ड होने पर शिल्प के निमित्त कारण अनेक पदार्थों का दृश्य धर्मत्व होता है, वैसे ही प्रमेय, प्रमाण, प्रमाता की सत्ता से अतिरिक्त रूप में चैतन्य की अनुभूति होने से सभी की मायानिमित्तक उत्पत्ति अवगत होती है। उस ज्ञात अथ अज्ञात से अतिरिक्त ही चैतन्य है, इस श्रुति से बोधित

भवेत्यर्थः। सत्तातिरिक्तपदार्थाभावात् ज्ञातृज्ञानज्ञेय-व्यवहाररहितं सदिति किं न किमपि शून्यमेव इति चेन्न, एतच्छून्यं सर्वाभावत्वं भावे प्रतीयमानत्वात्। सत्ताश्रयि तत् शून्यं शून्यं कृत्वा चिद्रूपत्वात्; शून्यं शून्यस्वरूपं सच्चिन्मात्रं तत्स्वरूपत्वात् त्वं चिद्रूपः जगद्भावाभाव-साक्षी मायाविद्यारोपितशिवजीवोपाध्योर्वेत्ता, तदपवादे अवशिष्ट इत्यर्थः॥ १२॥

अध्यारोपापवादरहितोऽसीत्यर्थः। एतादृशे—

अन्तर्बाह्ये चित्त्वसत्त्वे त्यज द्वे
स्वानन्दैक्यं केवलं त्वम्भव स्वम्।

त्वं चैतन्य की अनुभूति होती है, विदित और अविदित से वह अन्य है, उस अनुभूति से सत् स्वरूपमात्र तत्त्व है यह अवगत होता है। सत्ता के अतिरिक्त पदार्थ न होने से ज्ञाता, ज्ञान और ज्ञेय व्यवहार-रहित सत् ही एकमात्र है, किन्तु यह आशङ्का होती है कि वह शून्य ही है, कुछ भी नहीं है, यह क्यों नहीं माना जाय। यह शून्य सब की अभावरूपता है जो भाव के रूप में प्रतीयमान है, अतः चैतन्य रूप भावत्व ही शून्यत्व है। सत्तामात्र का आश्रयण करनेवाला शून्य ही शून्य है, क्योंकि, वह चित्स्वरूप है। शून्य शून्य स्वरूप है, सत्, चित् की ही शून्य स्वरूपता होने से त्वं चित् रूप है, जगत् के भाव और अभाव का साक्षी माया और अविद्या से आरोपित शिव और जीव रूप उपाधियों का वेत्ता है, क्योंकि उपाधि के बाधित होने पर चैतन्य ही अवशिष्ट रहता है॥ १२॥

अध्यारोप और अपवाद से रहित यह काथ चैतन्य है।

अन्तः और बाह्य में चित्त्व सत्त्व आत्मानन्द स्वरूप तुम ही जड और शून्य ग्राहक चित् और सदाभास का परित्याग करो, चैतन्य

तद्रूपत्वादद्वयं तत्त्वन्तत्त्व-
वेत्ता कोऽस्मिन्कस्य वेत्तृत्वमस्ति ॥ १३ ॥

ननु निदिध्यासनं कर्तव्यं न वा, सति सामर्थ्ये अविकल्पत्वेन स्थेयमिति। अन्तः अन्तरे; चन्द्रास्ते अनुदितसूर्ये अन्तःकुम्भकदहराकाशे। सूर्यास्तेऽनुदितचन्द्रे द्वादशान्ते बाह्यकुम्भके। व्यक्ताव्यक्तातीतसर्वान्तरः सर्वसाक्ष्यहमित्यन्तरं तस्मिन् चिदाकारवृत्तित्वं चित्त्वम्, तत्स्वानुभूत्या व्यक्ताव्यक्तात्मकं सर्वं बाह्यम्, तत्सन्मात्रोऽहमित्युदारो भव। चतुष्टयव्यावृत्त्या सदिति सदाकारवृत्तित्वं सत्त्वं सन्मात्रे वृत्त्यभावात्। ते चित्त्वसत्त्वे द्वे जडशून्यग्रासके चित्सदाभासे त्यजेत्यर्थः। जडशून्यव्यावृत्तौ दुःखतमोग्रासकं विज्ञानमानन्दमात्मेति श्रुतिश्रवणेन स्वानन्दैक्यम्, आनन्दमात्रेणाविकल्प-

---

रूप होने से अद्वय स्वरूप तुम ही तत्त्व वेत्ता के सम्मुख और दूसरा क्या रह जाता है—जिसका ज्ञातृत्व तुम में रहे ॥ १३ ॥

निदिध्यासन करना चाहिए या नहीं, सामर्थ्य रहने पर अविकल्प रूप से रहना चाहिए। अन्तः = अन्तर में, चन्द्र के अस्त, सूर्य का उदय न होने तक अन्तः कुम्भक दहर आकाश में, सूर्यास्त और चन्द्र के उदय न होने तक द्वादशान्त में बाह्यकुम्भक में, सर्वसाक्षी मैं इस अन्तर में चिदाकार वृत्तित्व अर्थात् चित्त्व की स्वानुभूति व्यक्त और अव्यक्त सभी बाह्य उस सद्रूप में प्रतीत होता है, अतः सद्रूप मैं हूँ, इस प्रकार उदार हो। प्रमाणादि चारों की व्यावृत्ति होने पर सत् यह सदाकार वृत्तित्व सत्त्व रहता है, क्योंकि, सत् मात्र में वृत्ति नहीं होती है। वे चित्त्व और सत्त्व दोनों जड़ और शून्य के ग्राहक हैं चित् और सत् के आभास का परित्याग करो। जड़ और शून्य से व्यावृत्त दुःख और तम के ग्राहक विज्ञान आनन्दस्वरूप आत्मा है, इस श्रुति के अनुसार स्वानन्द की एकता, आनन्दमात्र अविकल्प

स्वरूपेण सहात्मैक्यं दुःखात्यन्ताभावात् आनन्द एवास्मीत्यानन्दावभासवृत्तित्यागेन केवलम् आनन्द-मात्रम्भवेत्यर्थः। हरिहरसमाधिस्वरूपत्वात्। ननु काष्ठात्यन्तदाहोत्तरं ज्वालात्यागः स्वयमेव भवति। तत्र त्यज इति असमञ्जसमिति चेन्न "येन त्यजसि तं त्यजे"ति मोक्षधर्मोक्तेः। अभ्यासादानन्दमयो ब्रह्मेति केषाञ्चिद् भ्रमः, मयटः प्राचुर्यत्वान्निर्देश्यानन्दमयस्य व्यावृत्तिद्वारा "ब्रह्मपुच्छं प्रतिष्ठे" त्युपसंहारबलात् "यतो वाचो निवर्त्तन्ते अप्राप्य मनसा सहे"ति श्रुतिप्रतिपादकत्वमा-निर्देश्यब्रह्मण इति तैत्तिरीयभाष्ये उक्तत्वात्। तद्रू-पत्वात्-अतो निरसनेन तत् ब्रह्मरूपत्वात् तत्त्वं न

स्वरूप के साथ आत्मा की एकता के होने से दुःख का अत्यन्त अभाव हो जाता है और आनन्दस्वरूप मैं हूँ, इस आनन्द अवभास की वृत्ति का परित्याग हो जाने से केवल आनन्दमात्र हो—यह आशय है। क्योंकि, हरिहर समाधि स्वरूप है।

यदि यह कहा जाय कि काष्ठ के अत्यन्त दाह के बाद ज्वाला स्वयं शान्त हो जाती है, अतः, त्यज = छोड़ो यह कथन समीचीन नहीं है। जिसे त्याग करते हो उसको छोड़ो—यह मोक्षधर्म कहा जाता है। अभ्यास से आनन्दमय ब्रह्म होता है—यह किसी को भ्रम हो सकता है, प्राचुर्य्य अर्थ में आनन्द शब्द से मयट् का विधान है, आनन्द का प्राचुर्य्य अर्थात् अनन्त आनन्दरूपता विवक्षित है, विकार आदि अर्थ में मयट् प्रत्यय कर आनन्दमय की व्यावृत्ति के द्वारा ब्रह्म पुच्छं प्रतिष्ठा, अर्थात् ब्रह्मस्वरूपता की प्राप्ति की विवक्षा होने से इस उपसंहार वाक्य के अनुसार जहाँ मन और वाणी की गति नहीं है—इस श्रुति के द्वारा ब्रह्म की अनिर्देश्यता प्रतिपादित की गई है—यह तैत्तिरीय उपनिषद् भाष्य में कहा गया है, तद्रूपत्वात् अर्थात् इतर की निवृत्ति के द्वारा ब्रह्मरूपता होती है—यह तत्त्व है अन्य

परमार्थतः तेन ब्रह्मणाऽद्वयस्त्वमसीत्यखण्डवाक्यार्थः। न तु संसर्गविशिष्ट इत्यर्थः। अस्मिन्नद्वयानन्दमात्रे को वेत्ता न कोपि, वेत्त्रभावात् कस्य वेद्यत्वं न कस्यापि, निर्धर्मके आरोपितवृत्त्यभावात्। अस्ति चेत्स्वयं स्वस्य वेद्यं वेदनं वेत्ता, स्वविषये प्रमाणप्रमेयप्रमातृत्वत्यागादित्यर्थः। अत एवाऽविकल्पस्वरूपम् "आत्मसंस्थं मनः कृत्वा न किञ्चिदपि चिन्तये"दित्युक्तेः॥ १३॥

एवम्भूते शुद्धबुद्धे स्वरूपे
काथावस्थां ब्रूहि मे त्वम्प्रबुद्धः।

की परमार्थता नहीं है, इसीलिए ब्रह्म से तुम अभिन्न हो यह अखण्ड वाक्यार्थ होता है, संसर्ग विशिष्ट वाक्यार्थ को प्रतीति नहीं होती है। इस अद्वय आनन्दमात्र की स्थिति में कौन वेत्ता है--अर्थात् कोई भी नहीं रहता है। क्योंकि, वेत्ता के अभाव में किसको वेद्यता है, अर्थात् किसी की भी नहीं रहती है, क्योंकि, निर्धर्मक में आरोपित वृत्ति नहीं रह सकती है। यदि वृत्ति मानी भी जायगी तो स्वयं ही स्व का वेद्य वेदन और वेत्ता होगा, क्योंकि अपने विषय में प्रमाण, प्रमेय और प्रमातृ नहीं रह सकता है। इसीलिए अविकल्प स्वरूप माना गया है, आत्मसंस्थित मन कर किसी प्रकार की वस्तु का चिन्तन करे--यह कहा गया है॥ १३॥

'एवम्भूते' अर्थात् प्रर्वोक्त ब्रह्मस्थिति भूत अनुभव विषय शुद्ध बुद्ध अर्थात् प्रकृति विकृति रहित स्वप्रकाश ज्ञान सम्पन्न ब्रह्मज्ञान होने पर, स्वरूप अर्थात् स्वयं जिसका स्वरूप हो गया है।

इस प्रकार अर्थात् पूर्वोक्त ब्रह्मस्थिति में प्रकृतिविकृतिरहित स्वप्रकाशकाल में काथ की अवस्था को (प्रकृष्ट ज्ञानवान् आप के द्वारा मैं सुनना चाहता) प्रकृष्ट ज्ञानवान् आप कहें, काथवेत्ता मैं

काथावेत्ता कोऽहमित्यात्मबाधः

निःसङ्गेऽस्मिन्नुत्थिता त्वय्यविद्या ॥ १४ ॥

एवम्भूते-पूर्वोक्तब्रह्मस्थितिभूते अनुभवारूढे-शुद्ध-बुद्धे-शुद्धश्च प्रकृतिविकृतिरहितं तत् बुद्धश्च स्वप्रकाशज्ञानं तस्मिन्। स्वरूपे स्वश्च तद्रूपं तस्मिन्। विश्वविश्वान्तकाले काऽवस्थेति-पृच्छकः मम वाक्यश्रवणजज्ञानेन प्रबुद्धः प्रकृष्टबोधवान् त्वमेवेदानीं मे मां प्रति ब्रूहि वदेत्यर्थः। तत्रावस्थातीते किञ्चिदसि चेदत आह-काथवेत्तेति। न किमपि वेद्यवेदनवेत्तृत्वाभावात्। मित्रमुखेन भगवता परिहासव्याजेनोक्तं सत्यमप्यबुद्धाऽज्ञानाभिमाननिमित्तका काथावस्था कोहमितिप्रत्ययलक्षणा पृच्छा हेत्वावरणविक्षेपशक्तिरूपाऽविद्या। कुत चेत् चिदघने त्वयि

कौन हूँ--निःसङ्ग चिद्घनस्वरूप तुम में कैसे यह आवरणस्वरूप अविद्या उत्पन्न हुई ॥ १४ ॥

एवम्भूत अर्थात् पूर्वोक्त ब्रह्मस्थिति भूत अनुभवारूढ शुद्ध-बुद्ध स्वरूप में अर्थात् शुद्ध अर्थात् प्रकृतिविकृतिरहित बुद्ध अर्थात् स्वप्रकाश ज्ञान उसमें (उस स्वरूप में) स्वरूप अर्थात् स्व और उसका रूप उसमें विश्व विश्वान्तकाल में कौन अवस्था रहती है--यह पूछने मेरे वाक्य के श्रवण ज्ञान से प्रबुद्ध अर्थात् प्रकृष्ट ज्ञान से सम्पन्न तुम हो अतः इस समय मेरे लिए तुम उसको कहो--यह अर्थ है। उस अतीत अवस्था यदि कुछ है तो तुम उसको कहो, क्योंकि, तुम काथ के ज्ञाता हो। ज्ञानयोग्य, ज्ञान और ज्ञातृत्व के अभाव में कुछ भी नहीं रहता है। मित्रभाव से भगवान् ने परिहास के व्याज से कहा सत्य होते हुए भी अबुद्ध अज्ञान एवं अभिमान निमित्तक काथ अवस्था में कौन हूँ--इस प्रकार ज्ञानस्वरूपा जिज्ञासा आवरण और विक्षेप स्वरूप अविद्या की जिज्ञासा है। किस प्रकार चैतन्य घने

उत्थिता तया स्वविषयाश्रयित्वबलेनावृतोऽसि खे नीलिमेव स्थाणौ पुंभ्रम इव आत्मबाधः आत्मनो निःसङ्गस्यावरणम् अघटनघटनपटुत्वात् तव ॥ १४ ॥

शून्यालम्बाऽलम्बनं सा भवेत्ते
सूर्याभायां वारिभासस्तथेयम् ।
भिन्नाभिन्ना नैव तस्मादवाच्या
जह्येनां स्वामद्वयानन्दबोधात् ॥ १५ ॥

विक्षेपावरणाऽत्यन्ताभावत्वान्निःसङ्गस्य ते तव शून्यालम्बालम्बनं—शून्यालम्बस्य आश्रयाश्रयिभावनिरस्तस्य आलम्बनम् आश्रयि, आच्छादनमभवदित्यर्थः। कथमिति ? चेदित्थम्। यथा, सूर्याभायां सूर्यस्या-

---

स्वरूप तुममें यह जिज्ञासा उत्पन्न हुई एवम् अपने आश्रयित्व के कारण आवृत हो आकाश में नीलिमा के समान मिट्टी की ढेर स्थाणु में पुरुष के भ्रम के समान आत्मा का वाध अर्थात् निःसङ्ग आत्मा का आवरण है अघटन घटना में अविद्या की पटुता के कारण ॥१४॥

आश्रय एवम् आश्रयिभाव से रहित का आलम्बन अर्थात् आवरण तुम्हारा होता है। जैसे सूर्य की किरणों से जल का आभास (मरुभूमि में) होता है। वैसे ही—यह है। अतः तत्स्वरूप = उससे अभिन्न और उससे भिन्न अर्थात् विलक्षण, सती, असती या उभयात्मिका नहीं कह सकते हैं, अपने अद्वय आनन्दबोध से इसका परित्याग करो ॥ १५ ॥

विक्षेप और आवरण अत्यन्ताभावस्वरूप होने से असङ्ग तुममें अर्थात् आत्मा में शून्याधार ही आलम्बन है। शून्यालम्बन के अर्थात् आश्रयाश्रायिभाव के निरस्त का आलम्बन = आश्रयी अर्थात् आच्छादन हुआ। इस तरह कैसे हुआ ? इस प्रकार हुआ, जैसे सूर्य की किरण में सूर्य की चारो ओर आभा अर्थात् दीप्ति उसमें जल

ऽऽसमन्तादाभा प्रकाशना तस्यां वारिभासः। तथेयं विवर्त्तरूपा यस्य सन्मात्रस्य विवर्त्तः तस्माद् भिन्नाभिन्ना तदात्मिका तद्विलक्षणा वा, सत्यसती उभयात्मिका तद्विलक्षणा वा, सावयवा निरवयवा तदुभयात्मिका विलक्षणा वा, न अनिर्वचनीयत्वात्। एवमद्वितीये ब्रह्मणि परमार्थभाववद्द्रव्यासम्भवात्। तस्मादेषाऽवाच्या। कथमिति चेत्। ब्रह्मणोऽद्वितीयत्वहानेर्भिन्ना न "विश्व-मायानिवृत्तिरि"ति श्रुतेः। अभिन्ना न "मायामेतान्त-रन्ती"ति श्रवणात्। भिन्नत्वाभिन्नत्वे परस्परप्रतियोगि-त्वात् नोभयस्वरूपा। भिन्नाभिन्नपदार्थयोर्विलक्षण-पदार्थात्यन्ताभावात् तद्विलक्षणा न। सतीति चेन्न "न सदासीदि"ति श्रुतेः। सांख्यप्रधानशब्दवन्नेतीत्यर्थः।

भासमान होता है वैसे ही यह विवर्त रूप है जिसका सत्मात्र का विवर्त है, उससे भिन्न अभिन्न अर्थात् तत्स्वरूप या उससे विलक्षण, सद्रूपा या असद्रूपा उभयात्मिका या उससे विलक्षणा, सावयवा या निरवयवा उभयात्मिका या उससे विलक्षणा नहीं है, अनिर्वचनीय होने से। इसी प्रकार अद्वितीय ब्रह्म में परमार्थ भाववान् द्रव्य के असम्भव से है। इसलिए यह अवाच्य है। अवाच्य कैसे है? ब्रह्म के अद्वितीयत्व की हानि होगी, अतः भिन्न नहीं है, क्योंकि, विश्वमाया की निवृत्ति होती है--यह श्रुति में कहा है। अभिन्न भी नहीं है, इस माया का सन्तरण करता है--यह कहा गया है। भिन्नत्व और अभिन्नत्व रूप नहीं माना जा सकता है, क्योंकि, परस्पर यह प्रतियोगी स्वरूप है, अतः, उभयस्वरूप नहीं हो सकता है। भिन्न और अभिन्न पदार्थों में विलक्षण पदार्थ का अत्यन्ताभाव होने से उससे विलक्षण नहीं हो सकता है। सत् स्वरूप माया को नहीं कहा जा सकता है, वह सत् नहीं है--यह श्रुति में कहा गया है। सांख्यसिद्धान्त के प्रधान शब्द के समान वह नहीं हैं। असत् भी अविद्या को नहीं कहा

असतीति चेन्न "नासदासीदि"ति श्रुतेः असत्पदार्थस्याप्रतीतेः। अनादिमायातरणे व्यासादिसत्तायामप्रवृत्तिः स्यात्। "मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते" इति भगवता साधनं नोक्तं स्यात्। तन्निमित्तसुखदुःखानुभवो न स्यात्। तर्हि सदसदात्मिका स्याच्चेन्न, परस्परविरुद्धधर्मत्वात्, तयोर्विलक्षणपदार्थशून्यत्वात्। निरवयवास्त्विति चेन्न, निरवयवकारणस्य सावयवजगत्कार्यासम्भवात्। तत्र तार्किकाः निरवयवपरमाणोः सावयवद्व्यणुकादिकं कार्यं भवत्येवेति चेन्नद्व्यणुकादि पृथिव्याश्चरमावयवत्वात् परमाणुश्चासावयवो भवति। तत्र कार्यस्य सम्भवः। न तु चरमावयवव्यक्तशून्यमहत्परिमाणविशिष्टमायायाः सावयवकार्यासम्भवात्, अणुत्वपरिमाणशून्यत्वात्।

जा सकता है, वह असत् नहीं है--यह श्रुति के अनुसार असत् पदार्थ की अप्रतीति होने से। अनादि माया के सन्तरण में व्यास आदि की सत्ता में अप्रवृत्ति होगी। मेरे प्रति जो प्रपन्न होते हैं, वे इस माया का सन्तरण करते हैं--अन्यथा इस साधन को गीता में भगवान् ही कहते। तन्निमित्तक सुख और दुःख का अनुभव भो नहीं होता। सत् और असत् स्वरूप माना जाय, यह भी नहीं कह सकते हैं, क्योंकि, ये दोनों परस्पर विरुद्ध धर्म है, अतः एक में नहीं रह सकते हैं, उनकी विलक्षण पदार्थ शून्यता भी है। अविद्या को निरवयव भी नहीं कहा जा सकता है, क्योंकि, निरवयव कारण का सावयव जगत् रूप कार्य सम्भव नहीं है। तार्किको के मत में निरवयव परमाणु से सावयव द्वयणूक् आदि कार्य होते हैं, यह भी नहीं कह सकते हैं, द्वयणुक आदि पृथिवी के चरम अवयव हैं और वे परमाणु सावयव होते हैं। इसलिए वहाँ कार्य सम्भव हैं, चरम अवयव व्यक्त शून्य महत् परिमाण विशिष्ट माया का सावयव कार्य नहीं हो सकता है। अणुत्व परिमाण से शून्य होने से। ऐसी स्थिति में इसे सावयव माना जाय,

तर्हि सावयवास्त्विति चेन्न "महतः परमव्यक्तमव्यक्ता-
त्पुरुषः पर" इति श्रुतेः। अव्यक्तत्वाच्च सावयवा वक्तुम-
शक्या भवेत्। सावयवास्त्विति चेन्न, सावयवनिरवय-
वयोः परस्परप्रतिकूलत्वात्। तद्विलक्षणेति वा निरवयवा
चेन्न, उभयविलक्षणपदार्थाभावात्। एवं द्वादशविकल्प-
शब्दाऽविषयत्वात् अवाच्या—न वाच्या न निर्वचनं यस्याः
सा। अनिर्वाच्येति—गुरुशास्त्रात्मप्रतीत्या ज्ञात्वा एनाम्
अतात्त्विकाऽन्यथाभावविवर्त्तेत्यनुभूतां जहीत्यर्थः।
कस्मादिति चेत्। अद्वयानन्दबोधात्—भोक्तृत्वादिद्वि-
तीयस्यात्यन्ताभावात्। अद्वयश्चासावानन्दश्चासौ बोध-
स्तस्मात् स्वाश्रयां स्वविषयाम्। स्वकीयां स्वां—स्वबोधे-
नैव रज्जुबोधेन रज्जुसर्पस्येवाऽन्तं गच्छेत्यर्थः। "नान्यः

महत् से परे अव्यक्त अव्यक्त से परे पुरुष है—यह श्रुति में कहा गया है। अव्यक्त होने से उसको सावयव नहीं कह सकते हैं। सावयव ही हो यह भी नहीं कहा जा सकता है, क्योंकि, सावयव और निरवयव परस्पर विरुद्ध है, उससे विलक्षण या निरवयव है यह भी नहीं कहा जा सकता है, दोनों से विलक्षण पदार्थ सम्भव नहीं है। इस प्रकार बारह विकल्प शब्दों का अविषय होने से, अवाच्य अर्थात् जिसका निर्वचन नहीं किया जा सकता है, यह भी नहीं कह सकते हैं। अनिर्वाच्य अर्थात् गुरु के द्वारा शास्त्र तत्त्व की प्रतीति अर्थात् ज्ञान से इसको अर्थात् अतात्त्विक अन्यथा भाव रूप विवर्त इस अनुभूति का परित्याग करें। क्यों परित्याग करे ? इसके समाधान में कहा है कि अद्वय आनन्द के बोध से अर्थात् भोक्तृत्व आदि द्वितीय का अत्यन्ताभाव होने से। अद्वय और आनन्द जो बोध स्वाश्रय या स्वविषयक स्वरूप ज्ञान से। स्वाम् अर्थात् स्वकीय स्वबोध से अर्थात् रस्सी के ज्ञान से ही रस्सी में सर्प के भान का नाश हो जाता है, क्योंकि, स्वरूप ज्ञान से अतिरिक्त और कोई भी

पन्था विद्यतेऽयनाये”ति श्रुतेः। “ब्रह्म वेद ब्रह्मैव भवती”ति श्रुतेश्चेति दिक्॥ १५॥

वेद्याभावे कस्य वेत्ताऽत्र कोऽसौ
वक्ष्याम्यस्मिन्भाषणं मे शृणु त्वम्।
काथेत्यस्याः सा न भाति त्वमेकः
सद्बोधार्थं वाक्यमेतत्प्रवृत्तम्॥ १६॥

तर्हि वेद्याभावेति—वेद्याभावे वेद्यविषयादर्शनकः असावयमात्मा अत्राद्वयानुभवे कस्य विषयस्य वेत्ता ज्ञाता, किन्तु ज्ञेयज्ञातृत्वाभावान्न कोऽपीत्यर्थः। तर्हि किमर्थं काथवेत्तासीति वाक्यप्रयोगः अस्मिन्विषये अहं त्वां ब्रवीमि, मे मम भाषणं शृणु। काथः—काथइति—का-

---

मार्ग मोक्ष का नहीं है--यह श्रुति वाक्य होने से, ब्रह्मज्ञ ब्रह्म ही हो जाता है--यह श्रुति वाक्य होने से॥ १५॥

वेद्यवस्तु के अभाव में किसका यहाँ कौन ज्ञाता रहता है, इस विषय में मैं कहूँगा मेरे कथन को तुम सुनो का से प्रतिपाद्य प्रातिभासिकसत्ता से अभिन्न का नाश हो जाने से जीव एक रूप में सद् रूप में अवगत होता है--इसी के ज्ञान के लिए यह वाक्य प्रवृत्त होता है॥ १६॥

इस समय वेद्य का अभाव रहता है, वेद्य के अभाव में वेद्यविषय का अदर्शनात्मक वह यह वह आत्मा है--इस प्रकार अद्वय अनुभव होने पर किस विषय का ज्ञाता (रहेगा) किन्तु ज्ञेय और ज्ञाता के अभाव से कोई भी नहीं रहता है--यह अर्थ है। यदि कोई भी ज्ञाता नहीं है तब तुम काथके वेत्ता हो--यह प्रयोग कैसे होता है? इस विषय में मैं तुम से कहता हूँ, तुम मेरा भाषण सुनो। ‘काथः’ अर्थात् ‘का इति’ का शब्द से प्रतिपाद्य पुरुष की यह प्रातिभासिक सत्ता से अभिन्न ईश्वरोपाधिस्वरूप है। ‘व्यथतीति’ थः यह संसारमय जीवों

शब्दप्रतिपाद्यपुरुषस्येयं प्रातिभासिकसत्ताऽभिन्ना ईश्वरोपाधिस्वरूपा । व्यथतीति–थः संसृतिभयमुत्पादयति जीवानां यथा–सूर्येऽन्धकारस्वरूपत्वमिवोलूकदृष्टिवत् जीवेश्वरोपाधिरूपस्वरूपोन्मुखस्फुरणद्वयलक्षणा बन्धमुक्तिहेतुका अस्याः काथसंज्ञकमायायाः स्वस्याः स्वयं सा माया भाता प्रकाशिका न जडत्वात् । तर्हि अस्याः प्रकाशकः क इति चेत् ? त्वं त्वमेवालम्बनं साक्षी सर्वाश्रय एकोऽद्वितीयः भासकोऽसीत्यर्थः । एतदर्थं काथवेत्तासीति वाक्यप्रयोगः । "सदेव सोम्येति" श्रुत्युक्तः सतो बोधः सद्बोधस्तदर्थम् । सद्बोधार्थं वाक्यं–काथवेत्ताऽसीति प्रवृत्तम् । एतत् पूर्वमुल्लेखितं सद्बोधितुमित्यर्थः ॥ १६ ॥

सन्मात्रोऽहं सत्तया सर्वमेकः
क्रोधघ्नाऽस्याः काथविद्यापराऽन्या ।

के लिए उत्पादन करता है। जैसे, सूर्य में अन्धकार स्वरूपत्व के समान उल्लू की दृष्टि की तरह जीव और ईश्वर की उपाधि रूप स्वरूप उन्मुख बन्ध और मुक्ति साधन रूप स्फुरणद्वयस्वरूप इस काथ संज्ञक माया का अपना अर्थात् स्वयं वह माया भाता = प्रकाशिका नहीं है, क्योंकि, जडस्वरूप होने से, ऐसी स्थिति में इसका कौन प्रकाशक है ? इस प्रश्न के उत्तर में तुम ही आलम्बन साक्षी सभी का आश्रय एक अद्वितीय भासक हो––यह अर्थ है, इसी के लिए काथ का वेत्ता हो––यह वाक्य प्रयोग होता है। हे सोम्य ! तुम सत्स्वरूप हो । यह श्रुति में कथित सत् का बोध सद्बोध अर्थात् सत् के बोध के लिए, सत्बोधक वाक्य काथवेत्ता हो–यह प्रवृत्त हुआ है, यह पूर्व में उल्लिखित सत् के स्वरूप बोध के लिए–यह अर्थ है ।१६।

मैं सन्मात्र स्वरूप हूँ और सत्ता के रूप में सब एक है, इसके विषयत्व की असिद्धि से यह विद्या क्रोध का नाशक है, इसके अनन्तर

चिन्मात्रोऽहं चित्स्वरूपश्चिदात्मा
सृष्ट्यन्तानां साक्षिरूपोऽव्ययोऽहम् ॥ १७ ॥

सन्मात्र इति। अस्मिन् श्लोके पूर्वप्रश्नत्रयाणां प्रत्येकत्वेन प्रत्युत्तरमाह—काथवेत्ता काथोपाध्यभावेऽवशिष्ट इत्यभावशून्यो यः सन्मात्रः सोऽहम्, न तु शून्यमसन्मात्रं तत् सत्तया मम सन्मात्रस्य प्रातिभासिकव्यावहारिकसत्ता तया सर्वमस्तीति प्रतीयमानत्वात्, सद्भिन्नं नास्तीति प्रतीतेश्च सर्वत्रैवैकोऽहमित्यनुभवः। "पुरुष एवेदं सर्वमि"ति, "वासुदेवः सर्वमि"ति च श्रुतिस्मृती। ब्रह्मणि गुरुतः श्रवणमननिदिध्यासनबलात् दृढश्चेत् पूर्णकामस्तस्मात् कामाभावत्वहेतुक्रोधाभावत्वात् सद्विद्येयम्। अत एव क्रोधघ्ना—क्रोधं हन्तीति क्रोधघ्ना

उत्कृष्ट अन्य कौन-सी काथविद्या है। (इसके समाधान में कहा है) मैं चिन्मात्र चित्स्वरूप, चिदात्मा हूँ, सृष्टि और प्रलय का साक्षी स्वरूप मैं सर्वथा विकाररहित हूँ॥ १७॥

इस पद्य में पूर्व के तीन प्रश्नों में प्रत्येक का उत्तर कहा गया है। 'काथवेत्ता' काथरूपी उपाधि के अभाव में अवशिष्ट अर्थात् अभाव शून्य जो सत्स्वरूप है—वह मैं हूँ, मैं शून्य असद्रूप नहीं हूँ, क्योंकि, सत्ता के द्वारा मेरे सन्मात्र का प्रातिभासिक व्यवहारिक सत्ता से सभी पदार्थों सद्रूप में प्रतीति होने से और सत् से अतिरिक्त कुछ नहीं है—यह प्रतीति होने से सर्वत्र मैं एक हूँ, यह अनुभव होता है। पुरुष ही सब कुछ है, वासुदेव ही सब है—यह श्रुति और स्मृति में प्रतिपादित होने से।

ब्रह्म विषयक गुरुमुख से श्रवण, मनन और निदिध्यासन के बल से दृढ होने पर पूर्णकाम होने से काम का अभाव होने से क्रोध का अभाव होता है—यह सद् विद्या है। इसीलिए क्रोधघ्न = क्रोध को

विषयत्वाऽसिद्धेश्च अस्या विद्यायाः। अथाऽनन्तराऽन्या परा उत्कृष्टा विद्याऽज्ञानप्रतियोगिन्यात्मवेदनाभिव्याञ्जिका, काऽस्ति ? किन्तु न कापीयमेवास्तीत्यर्थः, इति क्रोधघ्नविद्याप्रत्युत्तरम्। विश्वविश्वान्तकाले काऽवस्थेति प्रश्नोत्तरमाह—चिन्मात्रोऽहं— क्षेत्रजडांशव्यावृत्तिका चिद्वृत्तिस्तयाऽहं चिन्मात्र इत्यनुभवः। तस्य स्वरूपं किमिति चेत् ? चित्स्वरूपः-चिच्च तत्स्वं चित्स्वरूपमेव चित्स्वरूपः। किंलक्षणश्चिदात्मा-चित्स एव क्षेत्रमततीति क्षेत्रभातित्वात्। पुनः कीदृश-सृष्टयन्तानां "यतो वा इमानि भूतानि जायन्ते" इति श्रुत्युक्ताः खादिभूतानां सृष्टयो भूतानां प्रतिलोमेन स्वकारणेषु लयाः। अतो यत्प्रयन्त्यभिसंविशन्ती"ति श्रुतिबोधितास्तेषां साक्षीति

नाश करने वाला एवं इस विद्या के द्वारा विषयत्व की असिद्धि होती है। इसके बाद पर = उत्कृष्ट विद्या अज्ञान प्रतियोगी आत्मवेदन का अभिव्यञ्जक कौन है ? और कोई भी नहीं हैं––यही है, इस प्रकार क्रोध की नाशिका अविद्या है––यह उत्तर है। विश्व और विश्व के अन्त के समय कौन अवस्था रहती है––इसका उत्तर कहा जा रहा है। मैं चिन्मात्र स्वरूप हूँ क्षेत्र और जडांश का व्यावृत्त करने वाली जो चिद्वृत्ति उसके द्वारा मैं चिन्मात्र हूँ––यह अनुभव होता है। उसका क्या स्वरूप है ? उसका चित्स्वरूप है। चित् और स्व, चित्स्वरूप ही चित्स्वरूप है। चिदात्मा का क्या स्वरूप है ? वह चित् ही जीव को व्याप्त करता है, क्षेत्र का प्रकाशक होने से। पुनः कैसी सृष्टि और अन्त (प्रलय) का जिससे ये सभी भूत उत्पन्न होते हैं––इस श्रुति के द्वारा कथित आकाश आदि भूत पदार्थों की सृष्टि और प्रतिलोम क्रम में अपने कारणों में लय, इसीलिए, जिसमें लय प्राप्त करते हैं कारण स्वरूप में अवस्थित होते हैं उनका साक्षी–यह तटस्थ लक्षण वाला है जगत् का कारण मैं हूँ। प्रथम निदिध्या-

तटस्थलक्षणकः तद्रूपो जगत्कारणोऽहमिति, प्रथमं निदिध्यासनं गुर्वनुगृहीतस्य पूर्वोक्तं तत्पश्चात्कर्तव्यम् । तर्हि उपादानकारणस्य ब्रह्मणो मृद्राशेरिव मृद्भाण्डकरणे व्ययस्तथाऽस्त्विति चेन्न अव्ययः–द्रव्यत्वगुणत्वाभावान्न व्ययो यस्येत्यर्थः । अविक्रियत्वात्स्वरूपोऽहम् ॥ १७ ॥

एवं भूते काऽथ शुद्धास्त्यवस्था
व्यक्ताव्यक्तातीतमन्तर्वहिःस्थम् ।
व्यक्ताव्यक्तं तन्न बाह्यान्तरे द्वे
मौनेनाऽयं वाचकस्त्र्यक्षरोऽस्य ॥ १८ ॥

एवमुक्तप्रकारेण भूते ममोपदेशजज्ञानेनाऽनुभवप्राप्ते । अथ जडव्यावृत्त्यनन्तरं काऽवस्था ? विश्वविश्वान्त-

---

सन अर्थात् गुरु से अनुगृहीत का स्वरूप ज्ञान अनन्तर। ऐसा माननेपर मिट्टी का जैसे मिट्टी के पात्र के निर्माण में व्यय होता है, उसी प्रकार उपादान कारण ब्रह्म का व्यय होना चाहिए। अव्यय अर्थात् द्रव्य और गुण न होने से उसका व्यय नहीं होता है। अविक्रिय होने से स्वरूप ही स्थिर रहता है ॥ १७ ॥

इस प्रकार काथ यह शुद्ध अवस्था है, यह व्यक्त और अव्यक्त से अतीत अन्तः और बहिः अर्थात् अन्दर और उभयत्र एक रूप में अवस्थित है व्यक्त और अव्यक्त ये दोनों अन्दर और बाहर एक रूप में अवस्थित नहीं है, मौनरूप से तीन अक्षर 'ॐ' है। इसका वाचक है ॥ १८ ॥

इस प्रकार होने पर मेरे उपदेशजन्य ज्ञान से अनुभव की प्राप्ति होने पर। अथ जड की व्यावृत्ति के बाद कौन अवस्था रहती है ? सम्पूर्ण विश्व के अन्तकाल में अर्थात् लीन अवस्था होने पर शुद्ध

काले शुद्धा निर्मलास्तोति, ममानुग्रहेण सर्वज्ञस्त्वं पश्य न कापीत्यर्थः। अवस्थातीतब्रह्मैव शान्तिः। का इति पृछायाः प्रत्युत्तरमाह–व्यक्ताव्यक्तातीतं-व्यक्तं माया-कार्यं त्रयोविंशतितत्त्वसङ्घातम्, चर्तुविंशतत्त्वमव्यक्तं माया भगवच्छक्तिर्जीवभूता, तयोः साभासयोरतीतं भिन्नं निराभासत्वात्। तद्व्यक्ताव्यक्तं यस्माद्भिन्नं न तदाश्रयं तत्सत्ताकत्वात्। तदन्तर्बहिःस्थम्–अन्तरं च बहिश्च। यथेक्षुरसगुडशर्करादिषु तथान्तरे स एव रसः, सूदशिल्पिनिमित्तरूपस्पर्शादित्वेन बहिस्तथा तयोरन्तर्बहिरस्तिभातिप्रियत्वेन स्थितमपि व्यक्ताव्यक्तं न, यथा जलमपि समुद्रो नाश्रयधर्मत्यागात्। तथा तत्स्वरूप-

---

निर्मल अवस्था होती है, मेरे अनुग्रह से सर्वज्ञस्वरूप तुम देखो कुछ भी नहीं रहता है। अवस्था से परे ब्रह्म ही शान्ति है। वह शान्ति क्या है ?, इस जिज्ञासा के उत्तर में कहा गया है व्यक्त और अव्यक्त से अतीत है। तो इन तत्त्वों का सङ्घात मायाकार्य व्यक्त है, चौबीसवाँ तत्त्व अव्यक्त है, माया भगवान् की शक्ति जीवात्मिका है, उन साभास तत्त्वों से अतीत अर्थात् भिन्न है, क्योंकि स्वप्रकाशस्वरूप होने से निराभास होने से। तत् अर्थात् व्यक्त और अव्यक्त जिनसे भिन्न उनके आश्रित नहीं, क्योंकि व्यक्त और अव्यक्त उसकी सत्ता पर ही आश्रित हैं ये उसी के प्रकाश से अस्तित्व लाभ करते हैं। वह भीतर और बाहर सर्वत्र परिव्याप्त है। जैसे ईख का रस गुड और चीनी आदि में है, वैसे ही ईख के अन्दर में भी वही रस है। पाचक और शिल्पी साधन रूप स्पर्शादि रूप से जैसे बाहर है वैसे ही व्यक्त और अव्यक्त में अन्दर और बाहर अस्ति, = सत्ता, भाति = भान, प्रियत्व = आनन्द रूप से स्थित रहने पर भी व्यक्त और अव्यक्त सत्ता, भान और आनन्दस्वरूप नहीं है। जैसे जल भी समुद्र है आश्रय धर्म का त्याग न करने से वैसे ही उसका स्वरूप अन्दर और

मन्तर्बाह्यं नामरूपसुखदुःखं मायाकार्यं तस्मिन्कैवल्ये नेत्यर्थः । "नेति नेतीति गार्गी"ति श्रुतेश्च ॥ १८ ॥

अस्य कैवल्यस्य त्र्यक्षरो मौनेन वाचक इति तदेवाह—

आत्मा शब्दो विन्दुनादान्वितोऽयं
शक्त्या साकं मायिकेनैव शान्तः ।
निर्वाणं तत्केवलाऽनन्दबोध-
मेवम्भूता काथशान्तिः परात्मा ॥१९॥

आत्मेति—तर्हि काथबोधप्रणवौ कथमनिर्देश्यवाचकाविति चेदाह-आत्मा अकार उकारो मकार इति । त्रिवर्णस्वरूपोऽसौ अकार उकारो मकार इति । तान्येकश्वासमभवत् "तदेत दोमि"तिश्रुतेश्च मन्त्ररूपः, शब्द्यते

5055

बाहर है नाम, रूप, सुख और दुख स्वरूप माया का कार्य उस कैवल्य में नहीं है। क्योंकि—यह नहीं है, यह नहीं है, गार्गी——यह श्रुति में कहा गया है ॥ १८ ॥

इस कैवल्य का तीन अक्षरों वाला वाचक मौनरूप में इसी को आगे की पंक्तियों से कहा जा रहा है :——

बिन्दु और नाद से समन्वित यह आत्मा है; तीनों गुणों की साम्यावस्था के साथ एवं मायिक के साथ सुनिश्चित प्रणव जहाँ शान्त हो जाता है, केवल आनन्दबोध स्वरूप ही यह निर्वाण है ॥१९॥

अनन्तर काथबोध और प्रणव कैसे अनिर्देश्य के वाचक हैं——इसके समाधान के प्रसङ्ग में कह रहे हैं :——आत्मा अकार, उकार, मकार है, अकार, और उकार मकार तीन वर्णों के स्वरूप वाला वह आत्मा है। वे जब एकात्मक हो गये वही 'ओम्' है श्रुति के अनुसार मन्त्रात्मक है। शब्द करने से शब्द है अर्थात् बिन्दु और नाद से समन्वित प्रणव के उच्चारण के बाद सानुनासिक ध्वनिमात्र, सर्वत्र समस्वरूप,

इति शब्दः विन्दुनादान्वितः, प्रणवोच्चारोत्तरसानुनासिक-ध्वनिमात्रः, सर्वत्र समः, तुरीयज्ञानवृत्त्युत्पादकानुज्ञानु-भवदो विन्दुरित्यर्थः। ताल्वादिस्थानवर्जितकेवलाऽकार-तन्मात्रो नादः दशमवृत्तिनिरुद्धावस्थानुभवदः। विन्दुश्च नादश्च विन्दुनादौ ताभ्यामन्वितो युक्त इत्यर्थः। अयं प्रणवः सर्ववेदेषु वेदादित्वेन प्रसिद्धत्वादुल्लेखओमिति। शक्त्या साकमकारेण स्थूलविराट्कारणपञ्चीकृतभूतकार्य-व्यावृत्त्या मकारेण भूताव्यक्तकारणाऽव्याकृतावरणलया-त्मकव्यावृत्त्या विन्दुनादाभ्यां तुर्योन्मनात्मिकावस्था-व्यावृत्त्या ब्रह्मणः शक्तिर्गुणसाम्यस्वरूपा तया साकं मायिकेन च, सैव कस्मिन्ननेकत्वप्रदर्शनहेतुः शक्तिर्माया तस्या इदं त्रैगुण्यं मायिकं तेन सहैव सुनिश्चितोऽयं प्रणवो यत्र शान्तः—घृतकणस्तदप्यघृत इव लयंप्राप्तः। तत्सर्वो-पाधिव्यावृत्त्या तच्छब्दप्रतिपाद्यं लक्ष्यम्, नतु शक्ति-

---

तुरीय ज्ञानवृत्ति उत्पादक अनुभवप्रद बिन्दु—यह अर्थ है। तालु आदि स्थान से वर्जित केवल अकार तन्मात्रा स्वरूप नादात्मक दशम-वृत्ति से निरुद्ध अवस्थात्मक अनुभवप्रद बिन्दु और नाद बिन्दुनाद है, इनसे अन्वित युक्त यह अर्थ होता है। यह प्रणव सभी वेदों में वेद के प्रारम्भिक रूप में प्रसिद्ध होने से इसका उल्लेख है। शक्ति के साथ अकार से स्थूल विराट् कारण पञ्चीकृत भूतकार्य की व्यावृत्ति से बिन्दु और नाद के द्वारा चतुर्थ उन्मनात्मक अवस्था की व्यावृत्ति होने से ब्रह्मशक्ति = सत्त्व रजः तम की साम्यावस्था के साथ मायिक से वही किसी में अनेकत्व प्रदर्शन में साधन शक्ति माया उसका यह त्रैगुण्य अर्थात् उसके साथ निश्चित यह प्रणव जहाँ शान्त अर्थात् धृतकण भी अघृतकण के रूप में लय प्राप्त करता है। वह सभी उपाधियों की व्यावृत्ति से ओम् इस शब्द से प्रतिपाद्य लक्ष्य है, शक्ति-

ग्रहेणानिर्देश्यत्वात्, विद्याऽविद्यात्मकनियन्तृनियम्यत्वमीशजीवयोरुपाधिभूतप्रपञ्चः। सविषयप्रणवस्य निर्वाणहिमकणस्य जलमिवेत्यर्थः। "त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवार्जुने"ति भगवदुक्तेः वेदाः हेयत्वेन त्रैगुण्यविषया भवन्ति। निस्त्रैगुण्यमुपादेयत्वेन निस्त्रैगुण्यो भवेति वेदतुल्यभगवद्वचनात्। "सर्वे वेदा यत्पदमामनन्ती"ति श्रुतेश्च। अमात्रश्चतुर्थोऽव्यवहार्यः प्रपञ्चोपशमः शिवोऽद्वैत एवमोङ्कारस्यात्मा "आत्मैव संविशत्यात्मनाऽऽत्मानं य एवं वेद" इति माण्डूक्यश्रुत्या सविषयप्रणवलयोक्तत्वाच्च लयावशिष्टं प्रणवनिर्वाणम्। केवलानन्दबोधं–विदितसाभासरहितं केवलश्च तद्विषयसुखं तत् साधनसुखभोक्तृत्वादिदुःखात्यन्ताभावादानन्दश्च तदेव,

---

ग्रह से वाच्य नहीं है, क्योंकि, वह अनिर्देश्य है, विद्या और अविद्यात्मक नियन्ता और नियम्यत्व ईश्वर और जीव की उपाधि प्रपञ्च है। विषय समन्वित प्रणव का निर्वाण हिमकण का जल के समान है। वेद त्रिगुणात्मक है, हे अर्जुन ! तुम त्रैगुण्य शून्य हो जाओ, यह श्री भगवान् ने गीता में कहा है, वेद हेय होने से त्रैगुण्यविषय इसको कहा गया है। निस्त्रैगुण्य अर्थात् उपादेय होने से निस्त्रैगुण्य हो––यह वेद के समान भगवान् की वाणी से कहे गये हैं। सभी वेद जिस पद = स्थान अर्थात् ब्रह्म को कहता है यह श्रुति में भी कहा है। अमात्र चतुर्थ = अव्यवहार्य, प्रपञ्चोपशम, शिव, अद्वैत इसी प्रकार ओङ्कार तीन अक्षरमय है। आत्मा ही आत्मा से आत्मा में प्रविष्ट होती है––यह जो जानता है। इस माण्डुक्य श्रुति के अनुसार विषयसमन्वित प्रणव का लय कहने से लय से अवशिष्ट प्रणव निर्वाण है। केवल आनन्दबोध ज्ञात आभास शून्य, केवल स्वरूप है उस विषय और उसके साधन सुख भोक्तृत्व आदि दुःख का अत्यन्ताभाव होने से वही आनन्दस्वरूप और बोधस्वरूप है अर्थात् बोधनयोग्य = ज्ञेय

बोधस्वरूपश्च बोधनीयबोधनबोधकभेदरहिताखण्डम् । एवम्भूते ज्ञानप्रलये जाते सति, अथेदानीं शान्तिपृच्छकं पृच्छामि, एतदन्या पराऽतिशयेनोत्कृष्टा का शान्तिरस्तीत्यभिज्ञस्त्वं वदेत्यर्थः । किन्तु एतदतिरिक्तं नास्ति तस्मादियमेवेत्यर्थः ॥ १९ ॥

धर्मं कृत्वा माऽस्तु ते तत्फलेप्सा
त्यक्त्वा त्रित्वं तूर्यधर्मे रमस्व ।
भूतेभ्यः कमानन्दं त्वम्भवस्व
मानं त्यक्त्वा स्वस्वसिद्धोऽनपेक्षः ॥२०॥

इदानीं प्रश्नत्रयाणां प्रत्युत्तरमुक्त्वा आरुरुक्षूणामुक्तज्ञानसाधनीभूतचित्तशुद्धिहेतुर्धर्म उच्यते । धर्मं

बोधन = ज्ञान और बोधक के भेद से रहित अखण्ड है। इस प्रकार ज्ञान का प्रलय होने पर इस समय शान्ति की जिज्ञासा करता है। इससे अतिरिक्त परा = अतिशय उत्कृष्ट कौन-सी शान्ति है, आप सभी प्रकार से ज्ञाता हैं, अतः कहें। किन्तु, इससे अतिरिक्त नहीं है इसलिए यही है––यह अर्थ है ॥ १९ ॥

धर्म का अनुष्ठान कर उसके फल की कामना तुझे न हो, सत्त्व-रजस्तमोगुणात्मक फलों का परित्याग कर धर्म, अर्थ और काम का परित्याग स्वरूपानन्द स्वरूप मोक्ष में रमण करो, भूतों के द्वारा तुम किस आनन्द का अनुभव करते हो। मान का परित्याग कर सभी अपेक्षाओं से रहित तुम और मैं से परे ब्रह्मानन्द का अनुभव करो ॥ २० ॥

तीन प्रश्नों का उत्तर देने के बाद मोक्षधर्म पर आरोहण की इच्छा करने से कथित ज्ञान के साधनीभूत चित्त शुद्धि के साधन धर्म को कह रहे हैं––धर्मं कृत्वा। सभी के धारण करने के साधन धर्म-

कृत्वेति–धर्मः सर्वधारणहेतुर्न तु नाशदुःखादिहेतुरधर्मो धर्मः, वेदबोधितश्रेयःसाधनत्वरूपः पञ्चमहायज्ञस्वरूपः। "भूतयज्ञो मनुष्ययज्ञः पितृयज्ञो ब्रह्मयज्ञ" इति शातपथीश्रुतेः। अहरहर्भूतेभ्यो बलि हरेदित्यादि पञ्चचोदनालक्ष्येत्यादि देवयज्ञो धर्मः। एवमेषां यो यो धर्मः स स पञ्चमहायज्ञान्तर्गततया पञ्चमहायज्ञः, सर्वधर्मभूतोऽयं ब्रह्मादिस्थावरान्तैः स्वाधिकारानुसारेण क्रियते। तिर्यगादिष्वपूर्वोत्पत्त्यभावात् पापक्षयो भवति। कपोताख्याने मनुष्ययज्ञेन स्वर्गप्राप्तिरिति श्रवणात्। तिर्यञ्चोऽपि स्वराजानं पूजयन्तीति च पुत्रादीन्पालयन्ति। शास्त्राधिकाराभावेऽपि स्वभावप्रवृत्तव्यवहारक्षमा भवन्तीति श्रूयते।
"सहयज्ञाः प्रजाः सृष्ट्वा पुरोवाच प्रजापतिः।
अनेन प्रसविष्यध्वमेष वोऽस्त्विष्टकामधुक्।

विनाश और दुःख आदि का साधन अधर्म धर्म नहीं है, वेद विहित अर्थात् बोधित कल्याण का साधनभूत पञ्चमहायज्ञस्वरूप है। भूतयज्ञ, मनुष्ययज्ञ, पितृयज्ञ और ब्रह्मयज्ञ––यह शतपथ ब्राह्मण की श्रुति के अनुसार से प्रतिदिन भूतों को बलि देनी चाहिए इत्यादि पञ्चचोदना लक्ष्य इत्यादि देवयज्ञ धर्म है। इस प्रकार इनका जो-जो धर्म है वह पञ्चमहायज्ञान्तर्गत होने से पञ्चमहायज्ञ है। यह सभी का धर्म होने से ब्रह्मादि स्थावर पर्यन्त सभी प्राणियों के द्वारा अपने-अपने अधिकारों के अनुसार किये जाते हैं। पक्षियोनि में अपूर्व की उत्पत्ति न होने से पाप का क्षय होता है, क्योंकि, कपोत की कथा में मनुष्य यज्ञ से स्वर्ग की प्राप्ति कही गई है। पक्षियाँ भी अपने राजा की पूजा करती हैं और पुत्र आदि का पालन करती हैं। शास्त्र में अधिकार न होने पर भी स्वभाव से प्रवृत्त व्यवहार में समर्थ होती हैं––यह सुनते हैं।

पूर्व में ब्रह्मा ने कहा यज्ञ के साथ ही प्रजा की सृष्टि की गई है,

"देवान्भावयतानेन ते देवा भावयन्तु वः ।

परस्परं भावयन्तः श्रेयः परमवाप्स्यथे"ति भगवदुक्तत्वात् ।

व्यवसायात्मिकबुद्ध्या निष्कामत्वेन भगवदुद्देशेनाऽनुष्ठानेन देवान्भावयतां चित्तशुद्धिद्वारा ज्ञानेन परमश्रेयो मोक्षो भवति । अव्यवसायिनान्तु दृष्टभोगादीन्भुक्त्वा पुण्यक्षयो भवति । सुष्ठुदेवैः सम्यगनुगृहीतस्य स एव धर्मोऽनेन प्रकारेण भवति । स च "विषयवती प्रवृत्तिरुत्पन्ना मनसः स्थितिनिबन्धिनी"ति पातञ्जलसूत्रात् सवितर्कनिर्वितर्कसमाधिर्भूतयज्ञः ।

अथ वा रुद्रप्रयुक्तयोगे प्रतिलोमेन भूतलयहेतुपञ्चमहाभूतबलिदानेन अहंभूताधियज्ञं यजन्ति । सर्वाङ्ग-

---

इसका अनुष्ठान करो, अभिलाषा की पूर्ति होगी । इस प्रकार देवता की पूजा करने पर देवगण मानव की अच्छी भावना करेंगे, परस्पर भावना करने से उत्कृष्ट कल्याण की प्राप्ति करेंगे––यह भगवान् ने कहा है । निश्चयात्मक ज्ञान से निष्काम रूप से भगवान् को उद्दिश्य कर अनुष्ठान मे देवता की भावना करने से चित्त विशुद्धि होने से ज्ञान के द्वारा परमश्रेय अर्थात् मोक्ष होता है । अव्यवसायात्मक ज्ञान सम्पन्न व्यक्तियों की दृष्टि भोग आदि का भोग करते हुए पुण्य का नाश होता है । भलीभाँति देवों के द्वारा सम्यग् अनुगृहीत वही धर्म इस प्रकार से सम्पन्न होता है । विषयवती प्रवृत्ति उत्पन्न होकर मन की स्थिति का साधन है । इस पातञ्जल सूत्र के अनुसार सवितर्क और निर्वितर्क समाधि भूतयज्ञ है ।

अथवा रुद्र प्रयुक्त योग में प्रतिलोम क्रम से भूतलयसाधन पञ्चमहाभूत के बलिदान से अहंभूताधियज्ञ का याग किया जाता है । सर्वाङ्गधारणा से मनुष्याकृति में प्रमेय चैतन्य अधियज्ञयजन मनुष्य-

धारणया मनुष्याकृतौ प्रमेयचैतन्याधियज्ञयजनं मनुष्य-यज्ञः सप्तदशसंख्याकलिङ्गशरीरं तत्र मनोबुद्धिप्रधानानि दशेन्द्रियाणि तत्तद्देवतात्मन्यधिदेवसंयमाग्नौ हवनं दैव-यज्ञः। "ॐ इत्येकाक्षरं ब्रह्म व्याहरन्मामनुस्मरन्नि"ति भगवदुक्तप्रकारेण गुरूपदिष्टप्रणवार्थं स्मरन् सोऽहं शब्दस्य नादः प्रणवोच्चारणं भ्रुवोर्मध्ये नादान्तरात्मयजनं ब्रह्मयज्ञः। तज्ज्ञा सप्तदशी स्वधा तया सप्तधाऽन्तरात्मानं पितरमधियज्ञं यजतीति पितृयज्ञः। अयमेव पञ्चविधो धर्म्मयज्ञो वर्णाश्रमभेदेन कामनापरत्वेन नानाविधो भूत्वा देवमनुष्यतिर्यगादीन् जीवयेत्। गुणति एवं स्वधर्मयज्ञ-मधिकृत्य वर्ततेऽसावधियज्ञो विष्णुः "यज्ञो वै विष्णुरि"-ति श्रुतेः। अत एव प्रजानां यद्यदपेक्षितं तत्तद्भवतीत्यर्थः। सर्वस्वधर्मयज्ञानां परमोऽयं धर्मः। एतदनुष्ठानेन कृत-

---

यज्ञ है। सतरह लिङ्गशरीर है इसमें मन बुद्धिप्रधान दश इन्द्रियाँ हैं, उन इन्द्रियों के अधिष्ठातृ देवों में अधिदैव संयमरूपी अग्नि में हवन दैवयज्ञ है। ॐ इस एकाक्षर ब्रह्म का उच्चारण और मेरा अनुस्मरण इस भगवान् से कथित प्रकार के अनुसार गुरु से उपदिष्ट प्रणव के अर्थ का स्मरणपूर्वक सोऽहं शब्दरूपी नाद प्रणव का उच्चारण भौओं के मध्य में अन्य नादों का आत्मयजन ब्रह्मयज्ञ है। सतरह स्वधा से सात बार अन्तःआत्मस्वरूप पितर अधियज्ञ याग करना पितृयज्ञ है। ये पाँच प्रकार के धर्मयज्ञ वर्ण और आश्रम के भेद से कामनापरक होने से अनेक प्रकार के होकर देवता, मनुष्य और पक्षी आदि का जीवनाधान करते हैं। गुण एवं अपने धर्मयज्ञ को अधिकृत कर जो विद्यमान रहता है, वह अधियज्ञ विष्णु है—'यज्ञ ही विष्णु है' यह श्रुति में कहा गया है। इसीलिए प्रजा को जो-जो अपेक्षित रहता है, वह होता है। सर्वस्व धर्मयज्ञों का यह

कृत्यो भवति। "स ऐक्षत इति" श्रुत्युक्तसृष्ट्यादौ ईक्षण-मालोचनं तपःस्वरूपं स्वस्य धर्मः। आवरणविक्षेपरहिताऽत्मनि धारणाध्यानात्मकनिरोधोत्पादनहेतुर्धर्मः अपरोक्ष-साक्षात्कारत्वात्। "स एव परमो धर्मो यद्योगेनाऽत्म-दर्शनमि"ति याज्ञवल्क्यस्मृतेः। "यस्त्वात्मरति"रिति ज्ञानयज्ञं परमिति भगवदुक्तेः। एतद्धर्मस्तदेतत् क्षेत्रं यज। "तस्माद्धर्मात्परं नास्ती"ति श्रुतेः। निर्वृत्तिप्रवृत्ति-रूपधर्मं कृत्वा तत्फलेप्सा, तस्य धर्मस्य कामनया उपा-सितस्य वाऽन्तरफलं धर्मार्थकामात्मकम्। निवृत्तरूपस्य त्वणिमादिकं ज्ञानञ्च फलम्, तस्येप्सा ते तव माऽस्तु संसारप्रदं तत् क्रोधजनकत्वात्। निर्विषयधर्मानुष्ठानं भूयादित्यर्थः। शिविवत् त्रीन् कामक्रोधलोभशबलधर्मा-

---

परम धर्म है। इसके अनुष्ठान से मनुष्य कृतकृत्य हो जाता है। उस इक्षण = दर्शन इस श्रुति में कथित सृष्टि के आदि में ईक्षण अर्थात् आलोचन तपःस्वरूप अपना धर्म है। आवरण विक्षेपरहित आत्मा में धारणा-ध्यानात्मक निरोधोत्पादन का साधन ही धर्म है, अपरोक्ष साक्षात्कारात्मक = प्रत्यक्षात्मक होने से। जो योग से आत्मा का दर्शन अर्थात् साक्षात्कार है वही परम धर्म है यहाँ याज्ञवल्क्य स्मृति में कहा गया है। भगवान् ने भी जो आत्मरति है--इस ज्ञानयज्ञ को उत्कृष्ट कहा है। यह धर्म है अतः इस क्षेत्र की उपासना करो। इस धर्म से श्रेष्ठ कुछ नहीं है--यह श्रुति में कहा गया है। निर्वाण को प्रवृति धर्म बनाकर उस फल की प्राप्ति की इच्छा, उस धर्म की कामना से उपासना करने, धर्म, अर्थ और काम ये अवान्तर फल होते हैं। निवृत्त रूप का अणिमादि ज्ञान फल है, उसकी कामना तुमको न हो, वे संसार को देने वाले हैं, क्योंकि वे क्रोधजनक हैं, निर्विषय धर्म का अनुष्ठान होना चाहिए। शिवी के समान काम-क्रोध-लोभ-मोह नरक के द्वारभूत धर्माभासों को छोड़कर कामादि

भासान् नरकद्वारभूतान् त्यक्त्वा परित्यज्य, तुर्यधर्मे—कामाद्युक्तत्रयरहितनिर्हेतुके तुर्ये चतुर्थे धर्मे रमस्व रतिं कुर्वित्यर्थः। पापक्षयपुण्यातिशयं विनेदमशक्यम्। पापैस्त्याज्यः पुण्यैराश्रयितव्यः कथं भवामीति चेदाह कर्मणा मनसा गिरा भूतानामद्रोहेण, भूतेभ्यः ब्रह्मादिस्थावरान्तेभ्यः, कं धर्माऽविरुद्धयथाशक्त्या सर्वोपायैः सुखम् कायवाङ्मनोभिर्भगवद्बुद्धया सुखदो भवेत्यध्याहार्यम्। मानश्च महत्त्वं ददातीति मानदः त्वं भवेत्यर्थः। दुःखावसानभेदो मा भवेत्यर्थः। यत्कृतं परेभ्यः तद्भाविफलदातृत्वात्। मानं उक्तानुष्ठानेन भूतेभ्यः प्राप्तसन्मानः, तज्जन्याऽभिमानफलादिना सह तं मानं त्यक्त्वा मानाऽवमानाऽविषयत्वादहं मान्यो नेतीति भगवदुक्तज्ञानलक्षणम्, मानित्वेन मानित्वस्वरूपत्यागेनेत्यर्थः। स्वस्व-

---

उक्त तीनों से रहित निर्हेतुक चतुर्थ धर्म में रति करो। पापक्षय और पुण्यातिशय के बिना यह सम्भव नहीं है। पापों से छोड़ना चाहिए पुण्यों से आश्रयण करना चाहिए तब कैसा होऊँगा। कर्म से, मन से, वाणी से, प्राणियों के अद्रोह से, ब्रह्मादि स्थावर पर्यन्त धर्म से अविरुद्ध यथाशक्ति सभी उपायों से सुख शरीर वाणी और मन से एवं भगवद् बुद्धि सुखप्रद हो——यह अध्याहार करना चाहिए। मानमहत्त्व प्रदान करता है, अतः, मानप्रद तुम हो। दुःख के अवसान में भिन्नरूपता न हो। अन्य के लिए जो किया गया है, वह भावी फलप्रद है। मान अर्थात् उक्त अनुष्ठान के द्वारा प्राणियों से सन्मान की प्राप्ति होती है, उससे जन्य अभिमान रूप फलादि से उस मान का परित्याग कर मान और अवमान का अविषय होने से मैं मान्य नहीं हूँ——यह भगवान् से कथित ज्ञानलक्षण के अनुसार मानित्व से = अभिमानित्व स्वरूप का परित्याग करने से, एवं अर्थात् स्वसिद्ध

सिद्धः युष्मत्प्रत्ययगोचरव्यावृत्त्या स्वशब्दलक्षितमीश्वर-स्वरूपं तेन स्वस्वरूपेणाऽसिद्धः आत्मैकत्वसिद्धोऽपरान-पेक्षः व्यपेक्षारहितस्त्वम्भवेत्यर्थः। योगारूढश्चेति श्लोक-सङ्ग्रहार्थम्। आरुरुक्षोर्भवत्येव योगारूढत्वं तस्मात् ॥२०॥

कस्याऽपेक्षां मा कुरु त्वं समात्मा
क्षन्तव्यास्ते तर्ज्जना दारुस्ताः।
सांख्ये योगे लौकिके सप्रपञ्चे
कृष्णविष्णुं(?) जिष्णुशर्वं वद त्वम् ॥२१॥

कामाङ्गीकारे क्रोधादिदोषबाहुल्यादनिच्छया यद्भवतु तद्भवत्वित्यपेक्षानिषेधमाह—कस्य सुहृच्छिष्यपुत्रमित्र-सहायादिकस्य अपेक्षां सिद्धिनिमित्तं मम साहाय्यं कुर्वि-

---

युष्मत्प्रत्यय गोचर की व्यावृत्ति से स्वशब्द से लक्षित अपने ईश्वर स्वरूप के साथ असिद्ध आत्मा के एकत्व सिद्ध = अन्य की अपेक्षा से रहित तुम हो। योगारूढ़ यह श्लोक संग्रह के लिए है, आरुढ़ होने की इच्छा वाले हो यही योगरूढ़ता है ॥ २० ॥

सभी स्थिति में समभाव रखकर मित्र आदि किसी भी सहायक की अपेक्षा मत करो। राजस-तामसजनों से किये गये सुख-दुःख साधन भयंकर कष्ट को क्षमा करो। सांख्य-योग, लौकिक सभी प्रपञ्चों का परित्याग करो। कृष्ण-विष्णु, जिष्णु-महादेव सभी तुम ही हो जाओ ॥ २१ ॥

काम स्वीकार करने पर क्रोध आदि अनेक दोषों के बाहुल्य से जो होना है वह हो किसी प्रकार की अपेक्षा न करो। किसकी अपेक्षा न करो इसके समाधान में कहा है कि बन्धु, शिष्य, पुत्र, मित्र एवं सहायक आदि की अपेक्षा को अर्थात् मेरे कार्य की सिद्धि के

तीच्छाऽपेक्षा तां त्वं मा कुर्वित्यर्थः, ममानुग्रहात्।

"सुखदुःखे समे कृत्वा लाभालाभौ जयाजयौ।

ततो युद्धाय युज्यस्व नैवं पापमवाप्स्यसी"ति भगवदुक्तत्वात्।

समात्मा–सम उत्पत्तिस्थितिप्रलयेऽपि अविकृतस्वरूपोऽसौ।

"अविनाशि तु तद्विद्धि येन सर्वमिदं ततमि"ति च।

व्याप्येन व्यापकस्याऽनिष्टं कर्त्तुमशक्यमात्मैकत्वदर्शनेन, सुप्तव्याघ्रवत्सुखदुःखादिभोगरहितस्य ते तव भूतैः कृताः तर्ज्जनाः क्षन्तव्याः क्षन्तुं योग्याः। का इति चेत्-दारुणास्ताः राजसतामसजनकृताः धिक्कायोऽसि दुरात्माऽसि ध्वंसस्व, इतो गच्छ त्वमित्याद्यज्ञदुःखहेतुवाक्शल्यभूताः दारुणाः अज्ञहृदयदारुणत्वात्, ता एताः

लिए मेरी सहायता करो इस इच्छा रूपी अपेक्षा तुम मत करो, मेरे अनुग्रह के कारण।

सुख-दुःख, लाभ-हानि, जय-पराजय सभी को समान मानकर युद्ध के लिए तत्पर होगे तो पाप की प्राप्ति नहीं होगी––इस प्रकार भगवान् की उक्ति से। समात्मा अर्थात् उत्पत्ति, स्थिति और लय में भी अविकृत रूप वह है। उसे अविनाशी समझो जिससे यह विश्व विस्तृत रूप से उत्पन्न हुआ है। व्याप्य से व्यापक का अनिष्ट नहीं किया जा सकता है, एकात्म-दर्शन से सोये हुए बाघ के समान सुख-दुःख आदि भोगरहित तुम्हारी भूतों के द्वारा की गई तर्जना = कटु-व्यवहार क्षमा के योग्य है। वह कौन है, ये भयङ्कर हैं, अर्थात् राजस एवं तामस व्यक्तियों के द्वारा धिक्कृत शरीर वाले तुम हो, दुरात्मा हो, नाश हो जाय, यहाँ से तुम चले जाओ, इत्यादि अज्ञों के दुःख-साधन वाक्य जो कण्टक के समान भयङ्कर हैं, अज्ञहृदय के लिए भयङ्कर कष्टकर होने से, ये सभी प्राणियों के लिए दारुण रूप में

सर्वलोकहृद्दारुणत्वेन प्रसिद्धाः शुद्धाः। क्षमोत्तरं किं कर्त्तव्यं मयेति चेत् हरिहरनामोच्चारणस्मरणं कर्त्तव्यमित्याह सांख्ये चतुर्विंशतितत्त्वसंख्याया उत्पन्नं साख्यम्। किं तत्–पुरुषः अभोक्ता, अकर्त्ता, सुखदुःखक्रियाणाञ्च समभावनं ज्ञानम्, तस्मिन् स्थितः सन् च, योगे क्षिप्तमूढविक्षिप्तचित्तभूमिक्रान्तैकाग्र्यात्मविषयवृत्त्यस्मिता - मात्रः सविकल्पसमाधिर्योगः, तस्मिन् स्थितः सन्, परया वाचा नाम वदेदित्यर्थः। लौकिके–लोके भवो लौकिकाचारः, कुलधर्मादिकस्तस्मिंश्च। पुनः कीदृशे सप्रपञ्चे। "इन्द्रो मायाभिः पुरुरूप ईयते" इतिश्रुतेः। प्रोत्कृष्टदुःखदजगत्कारणमायया परवस्तु प्रपञ्च्यते इति प्रपञ्चस्तेन सह संसारः सुखदुःखानुभवस्तस्मिन्, वैखर्या वाचा सार्थं वदेत्यर्थः। सत्ता तत् किमानन्दप्रतिपादककृष्ण-

---

प्रसिद्ध हैं। क्षमा के बाद मुझे क्या करना चाहिए इसके समाधान में कह रहे हैं कि हरिहर के नामों का उच्चारण और स्मरण करना चाहिए। सांख्य में = चौवीस संख्याक तत्त्वों से उत्पन्न सांख्य है। क्या वह पुरुष अभोक्ता अकर्त्ता, सुख-दुःख क्रियाओं समभावनात्मक ज्ञान है, उस ज्ञान में स्थित होकर, योग में क्षिप्त, मूढ़, विक्षिप्त चित्त भूमि का अतिक्रमण कर एकाग्रात्म विषय वृत्ति अस्मितामात्र का अवलम्बन कर सविकल्प समाधि योग है, उस योग में स्थित होकर परावाणी से नाम का उच्चारण करे। लौकिक में = लोक के अनुसार किया जाने वाला आचार लौकिक आचार है, कुल धर्म आदि उसमें। पुनः किस प्रकार के सप्रपञ्च में = इन्द्र ने माया से पुरुरूप प्राप्त करता है यह श्रुति में कहा गया है। प्रकृष्ट उत्कृष्ट दुःखद जगत् कारण माया से परवस्तु का विस्तार होता है। अतः यह प्रपञ्च–इस प्रपञ्च के साथ संसार सुख-दुःख का अनुभव उसमें, वैखरी वाणी के द्वारा अर्थ सहित कहो। सत्ता वह क्या आनन्द प्रतिपादक

नामग्रहणेन कृतधर्माद्यक्षय्यसुखरूपं भवति। "प्रशस्ते कर्मणि तथा सच्छब्दः पार्थ युज्यत" इति भगवदुक्तेः। तत्सुखसङ्गेन बन्धप्राप्तिरिति चेत्-वेवेष्टाति व्यापकत्वात्तस्यैव नाम विष्णुरिति वदेदित्यर्थः। स एव स्वनाम्ना कामक्रोधादिशत्रून् जेतुं शीलमस्याऽसौ जिष्णुस्ते वद, पराभवाऽभावात्। अविद्या-भयमिति चेत्–शर्वम् अनाद्यविद्याबन्धयुक्तजीवानां तारकोपदेशेन बन्धं शृणोतीति शर्वं त्वं वदेत्यर्थः। अक्षयपुण्यजयेनाऽभिमाननिवारणार्थमिदम्।

ननु विष्णुशिवयोर्नामानि किमर्थमुक्तानि, द्वितीयपरमेश्वरस्याऽभावादेकस्यैव वक्तव्यानीति चेन्न, इयं वैष्णवशैवाऽभासानां विष्णुशिवस्वरूपमविदुषामवैदिकानां वा अत्र न श्रोतव्या।

कृष्ण का नाम ग्रहण से धर्मादि सम्पादन पूर्वक अक्षय सुख रूप होता है, क्योंकि हे पार्थ, प्रशस्त कर्म में सत् शब्द का प्रयोग होता है। उस सुख के साथ बन्ध की भी प्राप्ति होती है। वेवेष्टीति अर्थात् जो व्यापक है इस अर्थ को लेकर विष्णु शब्द कृष्ण का अपर पर्याय है, वही अपने नाम से काम-क्रोध आदि शत्रुओं को जीतने वाला होने से वह जिष्णु है, उसका पराभव = पराजय न होने से। अविद्यामय है इसके उत्तर में कहा है शर्व अर्थात् अनादि अविद्या बन्धन से युक्त जीवों का तारक के उपदेश से बन्ध को सुनता है, अतः शर्व है। अक्षय पुण्य के जय से अभिमान निवारण के लिए यह कहा है।

विष्णु और शिव का नाम क्यों कहा गया है, द्वितीय परमेश्वर के न होने से एक का ही कथन होना चाहिए, यह वैष्णवाभास और शैवाभासों का विष्णु और शिवस्वरूप अविद्वान् या अवैदिकों के लिए श्रोतव्य नहीं है।

तत्र शिव उवाच कृष्णम् ।
अहं त्वं सर्वगो देवस्त्वमेवाऽहं जनार्दन ।
आवयोरन्तरं नास्ति शब्दैरर्थैर्जगत्पते ॥
त्वदुपासा जगन्नाथ सैवाऽस्तु मम गोपते ।
यस्तु त्वां द्विषते देव स मां द्वेष्टि न संशयः ॥
त्वद्विस्तारोऽयं ते देव अहं भूतपतिस्ततः ।
न तद्वस्तु विना देव यत्ते विरहितं क्वचित् ॥
नामानि तव गोविन्द यानि लोके महान्ति ते ।
तान्येव मम नामानि नात्र कार्या विचारणा ॥
यदासीच्च वर्त्तते यच्च भावि जगत्पते ।
सर्वं त्वमेव देवेश यच्च किञ्चित्त्वया नहि ॥
इति हरिवंशे कैलासयात्रायां शिवोक्तसार्थनामोच्चारणम्, सर्वधर्मेभ्योऽन्तरङ्गोऽधिकतरश्च धर्मोऽयम् ।

शिव ने कृष्ण से कहा :—

मैं और आप सर्वत्र परिव्याप्त देवता हैं, हे जनार्दन ! तुम और हम एक ही हैं। हे जगत्पते ! शब्द और अर्थ किसी भी रूप में हममें और तुममें कोई अन्तर नहीं है।

हे जगन्नाथ ! तुम्हारी जो उपासना है, हे गोपते ! वही हमारी भी उपासना है। जो तुमसे द्वेष करता है, वह हमसे भी द्वेष करता है, इसमें सन्देह नहीं है।

हे देव ! तुम्हारा ही यह विस्तार है, इसीलिए मैं भूतपति हूँ। हे देव ! ऐसा कोई स्थान नहीं है जो तुम से रहित है।

हे गोविन्द ! तुम्हारे जो श्रेष्ठ नाम हैं, वे ही मेरे भी नाम हैं, इसमें सन्देह या विचार का अवसर नहीं है।

हे जगत्पते ! जो था, जो है, और जो भविष्य में होगा, हे देवेश ! वह सब तुम ही हो, तुम्हारे बिना कुछ भी नहीं है।

यह हरिवंश में कैलासयात्रा के प्रसङ्ग में शिव कथित सार्थक नाम का उच्चारण है, सभी धर्मों से अन्तरङ्ग और अधिकतर यही

कस्मात्–हिंसादिपुरुषान्तरद्रव्यान्तरदेशकालादिनियमाऽनपेक्षत्वाद्याधिक्यकारणमिति, सहस्रनामभाष्ये आचार्यवचनात्।

"ध्यायन् कृते यजन्यज्ञैस्त्रेतायां द्वापरेऽर्चयन्।

यदाप्नोति तदाप्नोति कलौ सङ्कीर्त्य केशवमि"ति विष्णुपुराणे।

सर्वपापनिकृन्तनं सद्यश्चित्तशुद्धिकरं नामेत्यजामिलादीनामनुभवोऽस्माकन्तु नेतोति मा वद, सद्यःप्रतीतिविधानेनोच्चारणात्। तत् किं विधानं तदाह—

"तृणादपि च नीचेन तरोरपि सहिष्णुना।

अमानिना मानदेन कर्त्तव्यं हरिकीर्त्तनम्॥" शरीरं विस्मृत्याऽष्टसात्त्विकभावैः प्रेम्णाऽर्थदृष्ट्या कीर्तनं कर्त्तव्यम्। निर्मात्सर्येण सद्यः सिद्धिः। कथम्? कृत्वा पश्य। ननु ब्रह्मादीनामधिकः कः? एते जीवा वा ईश्वरो वेति

धर्म है। क्योंकि, हिंसा आदि पुरुषान्तर द्रव्यान्तर देशकालादि नियम से अनपेक्ष होना ही अधिकार का कारण है। सहस्रनामभाष्य में आचार्य वचन से सत्ययुग में ध्यान करते हुए, त्रेता में यज्ञ करते हुए, द्वापर में पूजा करते हुए, जो प्राप्त होता है, वह कलियुग में केशव का सङ्कीर्तन से प्राप्त होता है––यह विष्णुपुराण में कहा गया है। सभी पापों का उच्छेद करने वाला एवम् अविलम्व चित्त को शुद्धि करने वाला नाम है––यह अजामिल आदि का अनुभव है हम लोगों को नहीं है––यह नहीं कहा जा सकता है, सद्यः प्रतीति विधानपूर्वक उच्चारण होने से। वह कौन-सा विधान है––इस प्रसङ्ग में कहा गया है––तृण से भी नीच से; सहिष्णु वृक्ष से भी मानदाता अमानी के द्वारा सदा हरिकीर्त्तन करना चाहिए। शरीर की विस्मृतिपूर्वक अष्टविध सात्त्विक भावों से प्रेम से अर्थदृष्टि पूर्वक हरिका कीर्त्तन करना चाहिए। मात्सर्य रहित अर्थात् निरभिमान होने से सद्यः सिद्धि होती है। कैसे? करके देखो। ब्रह्म आदि से कौन अधिक

चेदाह—"कार्योपाधिरयं जीवः कारणोपाधिरीश्वर" इत्याथर्वणश्रुतेः। विष्णुपुराणे गुणमूर्त्तित्वमुक्तत्वात् गुणनियन्तृत्वाच्च गुणमयो कारणोपाधिनित्यमुक्तत्वाभ्याश्च त्रयः परमेश्वराः, न तु जीवा।

"प्रकृतिं स्वामधिष्ठाय सम्भवाम्यात्ममायया"। "तदात्मानं सृजाम्यहमि"ति च भगवदुक्तेः। रजःसत्त्वतमोमयीं मायामधिष्ठाय ब्रह्मादिविग्रहेण सम्भवत्येकः परमेश्वरः—नित्यमुक्तो निरावरणः सर्वज्ञाऽत्मज्ञानविग्रहः शुद्धज्ञानस्वरूपो निर्गुणोऽपि सगुणः, निरतिशयाऽत्मज्ञाननित्यगुणत्वात्परमेश्वरः। "यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ती"ति श्रुत्युक्तलक्षणत्रयमात्मज्ञानविग्रहे परमेश्वरे। तस्याऽवतारत्रिमूर्त्तिषु निरतिशयत्रिलक्षणसृष्ट्यादिकृत्यात्मकं

है, ये जीव हैं या ईश्वर हैं? इसके उत्तर में कहा है, यह जीव कार्योपाधि हैं और ईश्वर कारणोपाधि है—यह आथर्वण श्रुति में कहा गया है। विष्णुपुराण में गुणमूर्त्तित्व कहा गया है और गुणों का नियन्ता होने से गुणमयो कारणोपाधि और नित्य-मुक्त होने से तीनों परमेश्वर हैं, जीव नहीं हैं। अपनी प्रकृति का आश्रयण कर अपनी माया से अवतीर्ण होता हूँ एवं तब मैं अपनी सृष्टि करता हूँ—यह भगवान् ने कहा है। सत्त्व रजः और तमोमयी माया का अवलम्बन कर ब्रह्मा आदि विग्रह धारण करता हूँ, अतः एक परमेश्वर नित्यमुक्त, निरावरण सर्वज्ञ, आत्मज्ञान स्वरूप निर्गुण होते हुए भी सगुण, निरतिशय आत्मज्ञान नित्यगुणवान् होने से परमेश्वर है। जिससे ये सभी प्राणिगण उत्पन्न होते हैं, जिससे उत्पन्न हो जीवित रहते हैं और अन्त में जिसमें लीन हो स्थित होते हैं—इस श्रुति से कथित तीनों लक्षण आत्मज्ञान शरीरी परमेश्वर में है। त्रिमूर्ति स्वरूप उसके अवतार में निरतिशय लक्षणत्रय समन्वित सृष्टि-स्थिति-लयात्मक तीनों कृत्य से विशिष्ट स्वरूप सुना गया है,

श्रुतत्वात् त्रिमूर्त्यात्मकसाकारोऽयं परमेश्वरः, ब्रह्मादिकाऽत्रिसंवादे निर्णीतत्वात् । पुराणादिष्वाधिक्यमेकैकस्य दृश्यत इति । यदाह–

"रजस्तमश्चाभिभूय सत्त्वं भवति भारत ।

रजः सत्त्वं तमश्चैव तमः सत्त्वं रजस्तथे"ति भगवद्वचनात् ॥

यदा रजःप्रधानेन ब्रह्माण्डोत्पत्तिस्तदा ब्रह्मणो विष्णुरुद्रोत्पत्तिः । सत्त्वप्रधानेन यदा तदा विष्णोः ब्रह्मरुद्रोत्पत्तिः । तमःप्रधानेन रुद्राद् ब्रह्मविष्णुदेहोत्पत्तिः । तत्तदभिप्रायदृष्ट्या तत्तत्पुराणानि व्यासः करोति । स्वस्वप्रकृतेर्निवृत्तिप्रवृत्तिनिरतिशयकृतित्वगुणाधीनत्वशून्य-त्वाच्च परमेश्वरः कार्योपाधिस्थजीवानां सृष्ट्यादिकृत्यभावात् । ब्रह्मा विष्णुः रुद्र ईश्वरः सदाशिव उत्तरोत्तर-

---

त्रिमूर्त्यात्मक यह साकार परमेश्वर दत्तात्रेय हैं––यह ब्रह्म आदि के साथ अत्रि के संवाद से निर्णीत हैं । पुराणादि में एक-एक की अधिकता देखी जाती है । जैसा कहा गया है––हे भारत ! जो-जो गुण और तमोगुण का अभिभव कर सत्त्व होता है । सत्त्व और रजः को अभिभव कर तमोगुण, तमोगुण और सत्त्वगुण का अभिभव कर रजोगुण रहता है––यह भगवान् की उक्ति से निर्णीत है । जब रजोगुण की प्रधानता से ब्रह्माण्ड की उत्पत्ति होती है तब ब्रह्म से विष्णु रुद्र की उत्पत्ति होती है । जब सत्त्व की प्रधानता रहती है, तब विष्णु से ब्रह्मा और रुद्र की उत्पत्ति होती है । तमः की प्रधानता रहने पर रुद्र से ब्रह्मा, विष्णु के विग्रह की उत्पत्ति होती है इन अभिप्रायों से पुराणों का व्यास निर्माण करते हैं । अपनी-अपनी प्रकृति की निवृत्ति प्रवृत्ति निरतिशय कृतित्व गुणाधीनत्व शून्य होने से परमेश्वर है वह कार्योपाधिस्थ जीवों की सृष्टि आदि कृत्य करने में समर्थ नहीं होता है । ब्रह्मा, विष्णु, रुद्र, ईश्वर, सदाशिव उत्तरोत्तर

मधिक इति शैवाः। अनिरुद्धप्रद्युम्नसङ्कर्षणवासुदेव-नारायणेति वैष्णवाः। यथा शालग्रामे विष्णोरुपासना। तथा–पञ्चभूतगतसमष्टिजीवे न्यूनाधिक्यजीववैषम्य-भेदेन परमेश्वरोपासना। न तु कारणोपाधिमूर्त्तिवत्त्व-निर्णयः। मोक्षधर्मे कृतान्तसांख्ये गुणसाम्ये त्रयाणां समत्वम्, क्षोभे तु परस्परं नियन्तृनियम्यगुरुशिष्य-त्वादिलीलाकौतुकं लोकशिक्षार्थम्। "तस्याऽऽत्मानुग्रहा-ऽभावेऽपि भूतानुग्रहः प्रयोजन"मिति पातञ्जलसूत्रात् कृते ईश्वरविग्रहभेदेऽपि कारणोपाधिव्यवहारतो न तत्र वैषम्यमिति। परमशैववैष्णवपरं भावविद्धमिदम्। तस्मादद्वितीयः परमेश्वरः, साकारोऽपि समष्टिजीवसङ्क-ल्पान्मूर्त्तिशून्यमूर्त्तित्वम्, न तु कर्मजम्।

"अव्यक्तं व्यक्तमापन्नं मन्यन्ते मामबुद्धयः।
परं भावमजानन्तो मम भूतमहेश्वरमि"ति

भगवदुक्तेः।

श्रेष्ठ हैं––यह शैव मानते हैं। अनिरुद्ध, प्रद्युम्न, सङ्कर्षण, वासुदेव, नारायण उत्तरोत्तर उत्कृष्ट हैं––यह वैष्णव मानते हैं। जैसे शालग्राम में विष्णु की उपासना। वैसे ही = पञ्चभूतगत समष्टि जीव में न्यूनता आधिक्य रूप जीव की विषमता के भेद से परमेश्वर की उपासना होती है। कारणोपाधि मूर्तिमत्ता का निर्णय नहीं है। मोक्षधर्म में अन्त में गुण की समता होने पर तीनों का समत्व है। क्षोभ होने पर परस्पर नियन्ता, नियम्य गुरुत्व, शिष्यत्व आदि लीला कौतुक लोक-शिक्षा के लिए है। उसका अपने लिए अनुग्रह की आकांक्षा न रहने पर भी प्राणियों का अनुग्रह ही प्रयोजन है––यह पातञ्जल सूत्र से ईश्वर विग्रह के भिन्नता होने पर भी कारणोपाधि व्यवहार से वहाँ विषमता नहीं है परम शैव एवं वैष्णव यह भाव-विद्ध है। अतः परमेश्वर के उपदेश के समय सभी इन्द्रियों से ईश्वर-भाव से भावित होकर लयात्मक भजन के द्वारा शरीर और धन से

एवं चिदां मूर्त्त्युपासकानां ब्रह्मैव प्राप्तिः न तु प्रकृतिः ॥ २१ ॥

शिवविष्णुमेकं मात्सर्येण भजनप्रकारमाह—

सर्वैः खैस्तैर्देहगेहेन चाऽर्थै-
र्वन्दस्व त्वं रुक्मिणीशं परेशम् ।
द्रोहं लोभं मुञ्च दम्भमसूयां
दुर्बुद्धे त्वं स्वरूपञ्च भजेदम् ॥ २२ ॥

सर्वैः—परमेश्वरोपदेशसमये कम्पस्वेदरोमाञ्चस्वरभङ्ग-वेपथुवैवर्ण्याश्रुप्रलया इति सात्विकाऽष्टभावा गुरूपदिष्ट-परमेश्वरे वेद्यस्वरूपं शक्तिर्वा जायन्ते । तैः खैः तद्भाव-विशिष्टैः दशेन्द्रियैः तत्तद्देवताभिः सच्चिदानन्दमात्र-ब्रह्मणि लयात्मकभजनेन निर्गुण परमात्मस्वरूपं भज । तदाऽनुभवेन ज्ञानभजनेन सविकल्पदशायां "यतो वा

सभी वैभवों से परमातमा रुक्मिणीपति का भजन करो । हे दुर्बुद्धे ! द्रोह, लोभ, दम्भ, असूया का परित्याग कर उस निर्गुण के सगुण स्वरूप का भजन करो ॥ २१ ॥

शिव और विष्णु एक है मात्सर्य से भजनका प्रकार कहा है सभी तद्भाव विशिष्ट होकर देहमेह एवं वैभवों से रुक्मिणी पति परमेश्वर की आराधना करें, द्रोह लोभ दम्म असूया का परित्याग कर हे दुर्बुद्धे ! तु उनके इस स्वरूप का भजन करो ॥ २२ ॥

परमेश्वर के उपदेश के समय कम्प, स्वेद, रोमाञ्च स्वरभङ्ग, शरीरकम्पन विवर्णता, अश्रुप्रवाह के द्वारा सात्त्विक आठ भावों की अभिव्यक्ति पूर्वक गुरु के द्वारा उपदिष्ट परमेश्वर के वेद्यस्वरूप की शक्ति उत्पन्न होती है । उन सभी दशों इन्द्रियों से उन देवभावों से आविष्ट होकर सत्, चित् आनन्दस्वरूप मात्र ब्रह्म में लयात्मक भजन अर्थात् तल्लीन भाव से निर्गुण परमातमस्वरूप का भजन करो, उसके अनुभव से = ज्ञान-भजन से सविकल्प दशा में जिससे यह संसार

इमानि भूतानि जायन्ते" इत्यादि जगत्कर्त्ता भर्त्ता हर्त्ता इति तटस्थलक्षणलक्षितनित्यमुक्तत्वादिगुणैः सगुणं परमात्मानं भज। स एव प्रकृतिगुणावच्छिन्नदृष्टीनामार्त्त-जिज्ञास्वर्थार्थिनां कृपया गुणमयीं प्रकृतिं तामवष्टभ्य ऐन्द्रजालिक इव गुणमयी ब्रह्मविष्णुमहेश्वररामकृष्ण-दत्तादिविग्रहैः अमृतपुत्तलिकेव। ब्रह्म साकारमिव साकारस्वरूपं सगुणं निर्गुणं साकारं सर्वश्रेयस्करमिन्द्रिय-गोचरज्ञानप्रेमवन्दनेन वन्दस्व, अष्टधाऽष्टाङ्गसङ्कोचने-नेत्यर्थः। द्रोहः पराऽनिष्टचिन्तनम्। परदारापरद्रव्याभि-लाषो लोभस्तम्, धर्मध्वजित्वं दम्भः तन्तु इत्यपरम्। असूया परोत्कर्षाऽसहनता तां मुञ्च। अश्रेयस्कारत्वात् हे दुर्बुद्धे ? सभावेन काथवेत्तेति परिहासार्थमुक्तशब्देन येन दुष्टा बुद्धिर्यस्याऽसौ इदानीं द्रोहादिकं त्यक्त्वा

उत्पन्न होता है। इत्यादि जगत् के कर्ता, भरण-पोषण एवं संहार करने वाले इस तटस्थ लक्षण से लक्षित नित्यमुक्तत्वादि गुणों से सगुण परमात्मा का भजन करो। वही प्रकृति के गुणों से अवच्छिन्न दृष्टि-सम्पन्न आर्त्त जिज्ञासुओं अर्थियों की कृपा से गुणमयी प्रकृति अवष्टम्भन कर = निरोध कर ऐन्द्रजालिक के समान गुणमयी ब्रह्मा, विष्णु, महेश्वर, राम, कृष्ण, दत्तात्रेय आदि के विग्रहों, अमृत पुत्तलिका के समान, ब्रह्म के साकार के समान साकार स्वरूप सगुण, निर्गुण, साकार सर्वकल्याण कर इन्द्रियगोचर के ज्ञान और प्रेमपूर्वक बन्दना से बन्दना करो अर्थात् आठ प्रकार से आठों अङ्गों के सङ्कोचन से—यह अर्थ है। द्रोह = दूसरे का अनिष्ट चिन्तन, दूसरे की स्त्री और दूसरे के द्रव्य की अभिलाषारूपी लोभ का, धर्मध्वजित्व स्वरूप दम्भ सूत्र, असूया = दूसरे के उत्कर्ष का असहन न करने के भाव का परित्याग करो, क्योंकि, ये अकल्याणकर हैं। हे दुर्मते, भाव सहित काथवेत्ता होने से परिहास के लिए उक्त शब्द से दुष्ट बुद्धि जिसकी हो गई है, वह इस समय द्रोह आदि का परित्याग कर उस विषय के ज्ञान के ज्ञातृत्व का परिहार कर ज्ञाता के स्वरूप और अपने को

तद्विषयज्ञानज्ञातृत्वमवज्ञाय ज्ञातुः स्वरूपं स्वञ्च तद्रूपमनुत्तममिदं भज, मधुरताऽमृतमिवेत्यर्थः ॥ २२ ॥

निःसङ्गस्त्वं सङ्गमात्सज्जनानां
निष्कामस्त्वं सेवया निःस्पृहाणाम् ।
गाङ्गं पीत्वा सोमपस्त्वं भवस्व
शुद्धो भूत्वा शुद्धखं तद्भजस्व ॥२३॥

श्लोकेऽस्मिन्निष्कामः निःस्पृहः । सोमकपानफलसाधनमाह—निःसङ्ग इति । त्वदुक्तसाधनं कर्त्तुमशक्यमिति चेत् श्रृणु । निःसङ्गः निर्गतसङ्गो भव । कस्मादिति चेत्सङ्गमात्–अतिनिर्विकल्पभावेन त्यक्तमानेन प्रेम्णा च कृतः समीचीनः सत्सङ्गस्तस्मात् । केषामिति चेत्–नास्तिक्यात्यन्ताभावहेतुकनिर्वासनया सन्मात्राकार-प्रत्यक्सद्वृत्तिकाः जनाः सज्जनास्तेषाम् । परोपकारार्थकामोऽपि माऽस्त्वित्याह–धूममार्गस्य कर्मजन्येहाऽमुत्र फलभोग-

---

उस स्वरूप में मान कर श्रेष्ठ ज्ञानात्मक देव का भजन करो, मधुरता अमृत के समान है ॥ २२ ॥

सज्जनों के सम्पर्क से तुम निःसङ्ग हो, निःस्पृह व्यक्तियों की सेवा से तुम निष्काम हो, गङ्गाजल का पान कर सोमपान मत्त होकर भजन करो, शुद्ध होकर शुद्ध चिद्रूप का भजन करो ॥ २३ ॥

इस श्लोक में निष्काम और निःस्पृह सोमपान फल के साधन निःसङ्ग को कहा है । तुम्हारे कहे हुए ही साधन को करने में असमर्थ होने पर कहा गया है–सुनो, निःसङ्ग = अर्थात् सङ्ग-रहित हो, किस सङ्गम से रहित हो ? अतिशय निर्विकल्प भाव से मान का परित्याग कर प्रेमपूर्वक किया गया जो श्रेष्ठ सज्जनों का संसर्ग है, उससे । किनका ? नास्तिक्य का अत्यन्ताभाव साधन निर्वासना से सन्मात्राकार प्रत्यक् सद् वृत्ति वाले मनुष्यों = सज्जनों के सम्पर्क से, परोपकार के लिए कामना रहते हुए भी नहीं करना चाहिए, क्योंकि,

वासनासङ्गनिर्गतेऽपि, अक्षय्यमणिमा वैश्वर्यं समीचीन-मिति। वासनासङ्गोद्भवकामे किं साधनमिति चेत्; सेवया–अत्यादरेण श्रवणकीर्तनस्मरणपादसेवनाऽर्च्चनवन्दनदास्यसख्याऽत्मनिवेदनात्मिका भजनस्वरूपा तया। केषां—ब्रह्मविष्णुमहेश्वरसनकादिव्यासशुकशङ्करसदा-नन्दादिगुरूणां प्राप्तैश्वर्यैर्जिताणिमाद्यैरैश्वर्यैं स्पृहा येषां तेषाम्, परोक्षसेवया निर्गता विषयेच्छा कामाभाव इत्यर्थः, पूर्णकामत्वात्। कामो दुष्पूरः तुच्छशत्रुः मोक्ष-विरोधीति ज्ञानाच्च मीमांसकानामाग्रहो द्विजानां सोम-पानमावश्यकमिति चेत्–गाङ्गं गङ्गोद्भवं जलं यथेष्टं पिबेति। सद्रव्यश्चेत् गौर्वाक् श्रुतिरूपाः तत्संस्कृतं जलं सोमो गाङ्गं तत्, पानयोगो चेत्–सप्तदशी सोमकला जलं गाङ्गमूर्द्धलम्बिकया पिबेत्यर्थः। पीत्वा तज्जन्यचित्त-

---

धूममार्ग को कर्मजन्य यहाँ और अन्यत्र फल भोग वासना सङ्ग हटनें पर भी, अक्षय अणिमा-वैभव ठीक है। वासना सङ्ग के उत्पन्न होनें का क्या साधन है? सेवा अर्थात् अतिशय आदर पूर्वक श्रवण, कीर्तन, स्मरण, पादसेवा, अर्चन, वन्दन, दास्य, मित्रता और आतमनिवेदना-त्मक भजन रूपी सेवा से। किनकी सेवा से? ब्रह्मा, बिष्णु, महेश्वर, सनकादि व्यास, शुकदेव, शङ्कर, सदानन्ददिगुरुओं में प्राप्त ऐश्वर्यों से अर्जित अणिमादि ऐश्वर्यों में स्पृहा जिनकी है उनकी, परोक्ष सेवासे निर्गत विषय की इच्छा अर्थात् कामभाव यह अर्थ है पूर्णकाम होनें से। काम को कभी पूर्ण नहीं किया जा सकता है, क्योंकि, वह दुष्पूर है, वह तुच्छ शत्रु है और मोक्ष का विरोधी है इस ज्ञान से मीमांसकों का आग्रह द्विजों का सोमपान आवश्यक है, गाङ्गम् = गङ्गा के जल को यथेष्ट पिये। सद्रव्य हों तो गौः = वाणी श्रुतियों से उत्पन्न उससे संस्कृत जल सोम अर्थात् गङ्गा का जल है उसको, पानयोगी ही के लिए पन्द्रहवीं सोमकला जल गङ्गा जल है उसको उन्मत होकर पान करे, पीकर उससे चित्त की शुद्धि होने से गुरु के द्वारा ज्ञान के श्रवण से,

शुद्ध्या गुरोः सकाशात् श्रुतज्ञानेन। शुद्धखं-शुद्धं गुण-वर्जितमनिर्देश्यं खमिव व्यक्ताव्यक्तव्यापकं वासुदेव-स्वरूपं भज। भजनकृतित्यागेन तद्रूपत्वेन ज्ञानभजने-त्यर्थः। तद्वासुदेवस्वरूपं भज। "अक्षरं ब्रह्म परमि"ति भगवदुक्तेः॥ २३॥

नत्वा साधून्योगिनो देवसिद्धान्
सर्वर्षींस्तानर्यमादीन् गुरून् भो।
विश्वाधारं रुक्मिणीशं शिवेशं
नत्वा ज्ञातः काथबोधः समाप्तः॥ २४॥

श्लोकेऽस्मिन्–ग्रन्थान्ते मङ्गलमाचरति। साधून् धर्म-शीलान् योगिनः समाधिमतः देवसिद्धान्। एकादशरुद्राः द्वादशादित्याः अष्टौ वसवः द्वावश्विनौ च, एवं त्रयस्त्रिं-शद्देवाश्च ते सिद्धाश्च अणिमाद्यैश्वर्य्यवन्तश्च तान्। सर्व-र्षीन्–नारदादिदेवर्षयो भृग्वादिमहर्षयो वसिष्ठादिमहर्षयो

शुद्धख=शुद्ध गुणरहित अनिर्देश्य आकाश के समान व्यक्त अव्यक्त स्वरूप व्यापक वासुदेव के स्वरूप का भजन करो। भजन यत्न के त्याग से तद्रूप होकर ज्ञान भजन विवक्षित है, उस वासुदेव स्वरूप का भजन करो, अक्षर ही परब्रह्म है––यह भगवान् ने कहा है॥ २३॥

साधुओं, देवसिद्धों, योगियों को सभी ऋषियों, उन अर्यमा आदि गुरुओं को विश्व के आश्रय रुक्मिणोपति और शिवेश को नमस्कार कर काथबोध को समाप्त किया॥ २४॥

इस श्लोक के द्वारा ग्रन्थ के अन्त में मङ्गल का आचरण करना चाहिए उसका पालन किया है। धर्मशीलो समाधिमान् देवसिद्धों को, ग्यारह रुद्र, बारहों आदित्य, आठ वसु दोनों अश्विनीकुमार एवं तैंतीस देवता, अणिमादि ऐश्वर्य सम्पन्नों को नारद आदि देवर्षियों को वसिष्ठ आदि महर्षियों, अन्य ब्रह्मपुत्र आदि सभी ऋषियों जो

ब्रह्मपुत्रादयश्चान्ये सर्वर्षयः मन्त्रद्रष्टारस्तान्। अर्यमादीन्-अर्यमा आदिर्येषां ते सप्तपितृगणास्तान्। गुरून् ब्रह्मविष्णुशिवदत्तकपिलादयश्च सदाशिवदत्तसदानन्दादिहरिपादान्ताः मे मम गुरवस्तान्, नारायणब्रह्मवसिष्ठशक्तिपराशरव्यासशुकगौडगोविन्दशङ्कराचार्यादींश्च नत्वा। विश्वस्य जगत आधारमाश्रयभूतं परब्रह्म स्वशक्त्या द्विधा जातम्, घृतकणाद् घृतमिव जातमिवेत्यर्थः। तत्किं रुक्मिणीशं विवेशश्च। सत्तानिवृत्त्यैक्यस्वरूपमात्रकृष्णस्य स्वप्रकाशरुचिर्दीप्तिः रुक्मिणी तस्याः स्वात्मत्वेनेशस्तम्। मङ्गलशिवस्याऽत्यन्तमङ्गलता शिवा तस्याः स्वात्मत्वेनेशस्तश्च तौ नत्वा। काथबोधः-कश्च थश्च कथौ ईशजीवौ, तयोः स्वरुपकीर्तिः कथा, कथायास्तात्पर्यभूतोऽर्थः-काथः परंब्रह्म, तस्य बोधः बोधनहेतुरसौ समाप्तः, मुमुक्षुभिः सम्यगाप्त इत्यर्थः। ब्रह्मादीनां वारद्वयं नमस्कारः पुनरुक्तिश्चेन्न देवत्वगुरुत्वाभ्यां

मन्त्रद्रष्टा हैं, उनको नमस्कार कर अर्यमा आदि सात पितृगणों को ब्रह्मा, बिष्णु, शिव, दत्तात्रेय, कपिल आदि सदाशिव, दत्त, सदानन्द आदि हरिपर्यन्त सभी मेरे गुरुओं को, नारायण, ब्रह्मा, वसिष्ठ, शक्ति, पराशर, व्यास, शुकदेव, गौडगोविन्द, शङ्कराचार्य आदि का नमस्कार कर विश्व के आश्रयभूत परब्रह्म जो अपना दो प्रकार से उत्पन्न घृत के समान उत्पन्न रुक्मिणीपति और शिवेश। सत्ता की निवृत्ति से ऐक्यस्वरूप मात्र कृष्ण की स्वप्रकाश दीप्ति स्वरूप रुक्मिणी स्वात्मा होने से ईश्वर उसको-मङ्गल शिव की अत्यन्त मङ्गलता शिवा, उसकी आत्मस्वरूप से ईश को इन दोनों को नमस्कार कर। क और थ = ईश और जीव, उनकी स्वरूप कीर्ति कथा, कथा का तात्पर्य विषयीभूत अर्थ काथ अर्थात् परब्रह्म, उसका बोध, उसके बोधन का साधन समाप्त हुआ अर्थात् मोक्ष की कामना वाले को भलीभाँति प्राप्त हुआ। ब्रह्मा आदि का दो बार नमस्कार

नैव दोषः । एतेषां नमनफलं किमिति चेत्–स्वधर्मयोग-लिङ्गकर्मवेदमन्त्रशुद्धिसफलवृद्धिपुष्टितुष्टिब्रह्मचर्यज्ञानसर्व-यज्ञज्ञानयोगफलानाञ्च वृद्धिः सम्यग्ज्ञानपूर्वकनमनेने-त्यर्थः ॥ २४ ॥

श्रुत्वा त्वेनं शान्तरूपो बभूव
सद्ग्रन्थनं काशकं मुक्तिमार्गे ।
योगीन्द्राणां सद्रहस्यञ्च गुह्यं
सन्तोषान्तर्व्यापकेनैव गीतम् ॥ २५ ॥

ग्रन्थमिति । श्रुत्वा शिष्यस्य किं जातमिति चेत्–श्रुत्वेति एकाग्रार्थबुद्ध्या, न तु क्षिप्तसंमूढविक्षिप्ततया । तु निश्चयेन विपरीतं श्रुतश्चेत् पुण्यादिकं भवति अत एव एनं प्रसिद्धं सन्तोषानन्दवद्भगवदुक्तं–सद्ग्रन्थं–सन्मात्र-प्रतिपादकपदानि ग्रथितानि यस्मिंस्तम् । सद्ज्ञानविषये

होने से पुनरुक्ति नहीं है, क्योंकि, देवता और गुरु के नमस्कार में यह दोष नहीं है । इनके नमस्कार का क्या फल है––अपने धर्म का योग लिङ्ग कर्म वेद, मन्त्रशुद्धि, सफल वृद्धि, पुष्टि, तुष्टि, ब्रह्मधर्मज्ञान सर्वयज्ञ ज्ञानयोग फलों की वृद्धि भलीभाँति ज्ञानपूर्वक नमस्कार का फल है ॥ २४ ॥

इसको सुनकर शान्तस्वरूप हो गया, समीचीन प्रतिपादक तत्त्वों को ग्रन्थन, मुक्ति-मार्ग का प्रकाशन, योगीन्द्रों के समीचीन गुह्य रहस्यों का अन्य सभी तुष्टियो के व्यापक रूप में इसका गान किया गया है ॥ २५ ॥

इसके सुनने से शिष्यों को क्या मिला ? एकाग्र बुद्धि से सुनने पर, क्षिप्त संमूढ एवं विक्षिप्त रूप से श्रवण न करने पर निश्चित ही पुण्य आदि होता है, इसीलिए इस प्रसिद्ध सन्तोष और आनन्दप्रद भगवान् से कथित समीचीन ग्रन्थ सत्स्वरूप मात्र के प्रतिपादक तत्त्व

श्रवणमनननिदिध्यासनरूपमुक्तिमार्गं सूर्य इव काशकम्। अज्ञानाऽवरणाऽत्यन्तप्रतियोगी ज्ञानभास्करत्वात्। योगीन्द्राणां चित्तवृत्तिनिरोधधर्मिणां शुद्धतत्पदार्थबोधकत्वेन तेषां सद्रतस्य-सद्विषये रहस्यमैकान्तिकत्वात्, इत्यपरं गुह्यं गोपनीयम्। कथश्चेत् सन्तोषान्तर्व्यापकेन समीचीनत्वम्। निर्विषये चित्तत्त्वं तद्गतः तोषः सन्तोषः, तस्याप्यन्तरं व्याप्तं येनाऽसौ निरावरणः सर्वज्ञो दत्तात्रेयस्तेन गीतं-शिष्यस्य सन्तोषस्य खेदनिर्मूलनार्थं गानं कृतम्। सद्ग्रन्थं श्रुत्वा शिष्यः शान्तरूपो ब्रह्मसमन्वितः बभूवेत्यर्थः ॥ २९ ॥

अनादिनिधनो देवः सर्वव्यापी निरञ्जनः।
हृदयस्थः स्वयं वक्ता कर्त्ता कारयिता हरिः ॥२६॥

कोऽसौ दत्तश्चेदाह-अनादिनिधन इति। अनादिनिधनः-न विद्यते आदिर्यस्याऽसौ, अनादिश्च सर्वकारण-

---

जिसमें ग्रथित है, श्रवण मनन--निदिध्यासन स्वरूप मुक्तिमार्ग रूपी समीचीन प्रकाश अर्थात् सूर्य के समान दीप्तिप्रद, अज्ञानरूपी आवरण का अत्यन्त प्रतियोगी ज्ञानभास्कर होने से। चित्तवृत्ति के निरोध धर्मियों के शुद्ध तत्पदार्थ का बोधक होने से उनका सद्रहस्य सद्विषय में ऐकान्तिक रहस्य होने से, यह अन्य से गोपनीय है। अन्य सन्तोष का व्यापक होने से समीचीन है। निर्विषय में चित्त तत्त्व और तद्गत तोष ही सन्तोष है, उसके भी अन्तः परिव्याप्त होने से निरावरण सर्वज्ञ दत्तात्रेय के द्वारा गीत शिष्य के सन्तोष के लिए अर्थात् खेदनिर्मूलन के लिए यह गान किया है। सद्ग्रन्थ का श्रवण शान्तस्वरूप शिष्य ब्रह्म समन्वित होता है ॥ २५ ॥

आदि और अन्तशून्य सर्वव्यापी, निरञ्जनदेव हृदयस्थ स्वयं वक्ता कर्त्ता और कराने वाला हरि है ॥ २६ ॥

दत्तात्रेय कौन हैं ?--जिसका आरम्भ और अन्त नहीं है सभी का कारण होने से आदि इसका नहीं है, प्रलयकाल में जगत् जिसमें

त्वात्, प्रलये जगन्निधीयते यस्मिन्निति निधनश्चासौ देवः स्वप्रकाशः द्योतनत्वात्। सर्वव्यापी–सर्वं यत्किञ्चिद-विशेषं शुक्त्या शुक्तिरजतमिवेदं व्याप्तं येनाऽसौ। व्याप्यः स्थितोऽपि। संसारानुभवकारणमज्ञानाञ्जनं निर्गतं यस्मान्नानुभूतं कदाप्यनेनाऽसौ निरञ्जनः हृदयस्थः–परि-माणशून्योऽपि धीप्रेरकत्वेनाऽङ्गुष्ठमात्रावकाशे हृदि प्रती-यमानत्वात् हृदिस्थः। अशरीरोऽपि वक्ता विद्याऽरोपि-तवक्तृत्वात्। कर्तृत्वाच्च कर्त्ता। अयस्कान्तः लोहचालन-कृतिमानिव कारयिता यथा सत्कर्माणि सूर्यः। तथा हरिः स्मर्तृणां पापं हरतीत्यसौ हरिः, "हरिर्हरति पापानि दुष्टचित्तैरपि स्मृत" इति स्मृत्युक्तत्वात्। स्वयमकर्त्ताऽपि मायाशक्तिनिमित्तं कर्त्तृत्वं व्यावहारिकम्। परमार्थतः कर्त्ताऽकर्त्तेति वक्तुमशक्यः। जगत्कृतिः जडे प्रधानेऽ-सम्भवादीक्षणलिङ्गाच्च किञ्चिज्ज्ञत्वाज्जीवेप्यसम्भवात्।

लीन होता है, वह स्वप्रकाशस्वरूप देव है, द्योतनस्वरूप होने से, सभी अर्थात् अविशेष शुक्ति रजत के समान यह जिससे परिव्याप्त है, वह, व्याप्य स्थित होते हुए भी। संसारानुभव कारण अज्ञानरूपी अञ्जन जिससे निर्गत हो जाता है, जिसका कभी भी अनुभव नहीं किया है = वह निरञ्जन है। हृदय में स्थित, परिणामशून्य होने पर बुद्धि का प्रेरक होने से अङ्गुष्ठमात्र अवकाश में हृदय में प्रतीयमान होने से हृदयस्थ है। अशरीरी होते हुए भी वक्ता विद्यारोपितवक्तृत्व होने से। कर्तृत्व होने से कर्ता है। अयस्कान्त लोहे को चलाने में कृतिमान् के समान जैसे समीचीन कर्म को कराने वाला सूर्य है, वैसे ही हरि स्मरण करने वालों का पापहरण करता है अतः, हरि, है, हरि दुष्टों के चित्तों से भी पाप का हरण करता है––यह स्मृति में कहा गया है। स्वयं अकर्ता होने पर भी मायाशक्ति के द्वारा व्यव-हारिक कर्त्तृत्व है। पारमार्थिक दृष्टि से कर्त्ता और अकर्त्ता कुछ भी नहीं है। जड = प्रधान में असम्भव होने से ईक्षण हेतु से किञ्चित्

स्वकर्त्तृत्वाभिमाननिवारणार्था श्रुतिबोधितभावनेयं मौनेन भजनमित्यर्थः ॥ २६ ॥

इति श्रीदत्तात्रेयकारितश्रीमत्परमहंसपरिव्राजकहरिपादानन्दशिष्यसन्तोषानन्दकृतकाथबोधस्य साजनीकृतव्याख्यारूपकाथबोधविवेकः समाप्तः ॥

ज्ञातृत्व जीव में भी असम्भव है, अपने कर्तृत्त्व के निवारण के लिए श्रुति से बोधित यह भावना ही मौनपूर्वक भजन है ॥ २६ ॥

काथबोध का हिन्दी समाप्त हुआ

फलश्रुतिः प्रयोगश्च

षड्‌विंशे शतवारं वै मूलं तुलसीसन्निधौ ।
जप्त्वा श्रुत्वा शुचिर्मौनी सर्वान्कामानवाप्नुयात् ॥ १ ॥

छब्बीस श्लोकों को पवित्र होकर तुलसी के समीप सौ वार जप कर या मौन पूर्वक सुनकर सभी कामनाओं को प्राप्त करता है ॥१॥

लक्ष्यत्रयं परिक्रम्य ग्रन्थं तुलसीसंयुतम् ।
पुण्याहवाचनं कृत्वा वन्ध्या पुत्रवती भवेत् ॥ २ ॥

तीन लाख वार तुलसी से संयुक्त ग्रन्थ की परिक्रमा कर पुण्याह-वाचन करने पर बन्ध्या भी पुत्रवती हो जाती है ॥ २ ॥

धर्मं कृत्वेति यथार्थं वागर्थानतिरञ्जयेत् ।
धर्मवृद्धिर्भवेत्तस्य नाऽत्र कार्या विचारणा ॥ ३ ॥

यथार्थ धर्म का परिपालन करने पर वाणी और अर्थ का अति-रञ्जन करे, धर्म की वृद्धि भी होती है, इसमें किसी प्रकार का सन्देह नहीं है ॥ ३ ॥

सांवादित्याय स्वाहेति प्रतिश्लोकं जपेन्नरः ।
व्याधिमुक्तो भवेत्सद्यो जप्त्वा पूर्वविधानतः ॥ ४ ॥

मनुष्य "साम्वादित्याय स्वाहा" यह प्रत्येक श्लोक के साथ पूर्व में लिखित विधान के साथ जपकर सद्यः व्याधि से रहित हो जाता है ॥ ४ ॥

देहगेहेन चार्थांश्च जप्त्वाऽर्थान्प्राप्नुयात्सुधीः ।
भूतिकामश्च भूतिश्च ग्रन्थोपासनयाऽप्नुयात् ॥ ५ ॥

शरीर और गृह से अर्थों का अनुसन्धान करते हुए जप करने से विद्वान् धन को प्राप्त करता है वैभव की कामना करने वाला ग्रन्थ की उपासना से ऐश्वर्य को प्राप्त कर सकता हैं ॥ ५ ॥

जपान्ते भोजयेद्विप्रान्सुवासांसि च शक्तितः ।
सन्तोषाऽन्तः सशिष्यस्य लक्ष्मीस्तु सा बुधस्य च ॥ ६ ॥

जप के बाद शक्तिपूर्वक विप्रों को भोजन कराये और वस्त्र दे शिष्य के साथ सन्तोष की प्राप्ति होती है और विद्वान् को लक्ष्मी की प्राप्ति होती है ॥ ६ ॥

स सूर्यः साजनी तस्य सर्वज्ञपरमात्मनः ।
दत्तात्रेयस्य वै नाम्ना कुर्याद्ब्राह्मणतर्पणम् ॥ ७ ॥

उस सर्वज्ञ परमात्मा दत्तात्रेय के नाम से ब्राह्मण तर्पण करे वही सूर्य है उसी की साजनी है ॥ ७ ॥

पूर्णे कामे यथा शक्त्या भक्त्या विप्रांश्च तर्पयेत् ।
द्रव्याऽभावे सेवया वा यतीन्विप्रांश्च तोषयेत् ॥ ८ ॥

कामना की पूर्णता होने पर यथाशक्ति भक्ति-पूर्वक विप्रों को तृप्त करे, द्रव्य के अभाव में सेवा से तृप्त करे या यतियों और विप्रों को भोजन कराये ॥ ८ ॥

तस्य स्वप्नो भवेद्रात्रौ प्रतिबन्धश्च वक्ष्यति ।
अन्यथा कार्यसिद्धिश्च वित्तशाठ्यं विवर्जयेत् ॥ ९ ॥

ऐसा करने पर उसको रात में स्वप्न होता है और कार्य में प्रतिबन्धक की सूचना देता है, वित्त के व्यय में कमी न करे, यदि स्वप्न नहीं होता है तो कार्य की सिद्धि होती है ॥ ९ ॥

क्वाऽहं मन्दमतिर्बाला क्वाऽसावीशात्मबोधकः।
तद्विवेककृतिः सा मे जात्यन्धस्यैव दिव्यदृक् ॥१०॥

कहाँ मैं मन्दमति बालक और कहाँ वह परिपूर्ण बोधक ईश, उसकी विवेक कृति जन्मान्ध के लिए दिव्य नेत्र है ॥ १० ॥

करुणेयं दयार्द्रेण दीनार्तिहरणेन वै।
कर्ष्णिना पूजितेनैव सांवादित्येन वै कृता ॥११॥

दयार्द्र, दीनों के कष्टों का हरण करने वाले कृष्ण सम्बन्धी के द्वारा साम्वादित्य के द्वारा पूजित होने के कारण ही यह करुणा की गई है ॥ ११ ॥

सन्तोषाऽनन्दरूपेण गुरुणा भगिनीमिव।
पालयाम्यहमेव त्वां माभैषीस्त्विवति वादना ॥१२॥

'मत डरो' यह कहते हुए सन्तोषानन्द स्वरूप गुरु से भगिनी के समान मैं ही तुम्हारा पालन करता हूँ ॥ १२ ॥

साजनी करुणापात्रं सज्जनास्त्वेवं वदन्तु।
तेषां कृपाकटाक्षेण पुण्या भवतु साजनी ॥१३॥

साजनी करुणा पात्र है—यह सज्जन लोग कहे, उसकी कृपा कटाक्ष से साजनी पुण्यवती हो ॥ १३ ॥

इति वासनया जातः काथबोधविवेककः।
क्षम्यन्तां सज्जना मह्यं शरण्या दीनवत्सलाः ॥१४॥

इस प्रकार की वासना से काथबोध के विवेक से सम्पन्न दीन-वत्सल सज्जन शरणागत मुझ पर कृपा करें ॥ १४ ॥

भारद्वाजकुलोत्पन्नसाजनीकृतिकेन हि।
काथबोधविवेकेन प्रीयतां चित्स्वरूप्यसौ ॥१५॥

भारद्वाज कुल में उत्पन्न साजनी के प्रणेता से काथबोध के ज्ञान से चित्स्वरूपी वह प्रसन्न हों ॥ १५ ॥

सृष्ट्वा पालयतीत्यस्मात्यतिर्ब्रह्मैव नान्यथा ।
स्त्रीणां धर्मश्च तद्ध्यानं तेन तुष्यतु भास्करः ॥१६॥

सृष्टि कर पालन कर्ता दत्तात्रेय यति ब्रह्मा है, अन्यथा नहीं, स्त्रियों का धर्म उनका ध्यान है, इससे भास्कर प्रसन्न हो ॥ १६ ॥

नवीन प्रकाशित दुर्लभ ग्रन्थ

१ श्रीमद्भगवद्गीता (गीता) मधुसूदन सरस्वती कृत संस्कृत टीका तथा सनातन देव कृत हिन्दी टीका (१९८३) १५०—००

२ नामालिङ्गानुशासनम् नाम अमरकोशः (कोश) । अमरसिंह कृत । भानुजी दीक्षित (रामाश्रय) कृत 'रामाश्रमी' (व्याख्यासुधा) संस्कृत टीका तथा हरगोविन्दशास्त्री कृत 'मणिप्रभा' (प्रकाश) हि० टीकादि :

राज संस्करण २५०—०० कार्ड बोर्ड संस्करण १५०—००

३ काव्यप्रदीपः । म० म० श्रीगोविन्दप्रणीतः । वैद्यनाथ कृत टीका । पं० दुर्गाप्रसाद तथा वासुदेव लक्ष्मण शास्त्री पणशीकर सम्पादित- (१९८२) ५०—००

४ वेदान्तसूत्रवैदिकवृत्तिः । स्वामी हरिप्रसाद वैदिकमुनि विरचित । (१९८२) १५०—००

५ हरविजयम् । राजानक रत्नाकर विरचित । राजानक अलक कृत टीका सहित । पं० दुर्गाप्रसाद एवं काशिनाथ पाण्डुरङ्ग परब (१९८२) १००—००

६ चम्पूरामायणम् । राजाभोज कृत १-५ खण्ड तक, लक्ष्मणसूरि कृत छठवाँ खण्ड । रामचन्द्रबुधेन्द्र कृत टीका । वासुदेव लक्ष्मण शास्त्री पणशीकर सम्पादित । (१९८२) ४०—००

७ भामिनीविलासः (काव्य) जगन्नाथ कृत । राधेश्याम मिश्र कृत 'प्रकाश' हिन्दी टीका । अन्योक्ति विलास-प्रस्ताविक विलास २५—००

संपूर्ण ७५—००

८ कामसूत्र (कामशास्त्र) । वात्स्यायन मुनि कृत । यशोधर कृत 'जयमङ्गला' संस्कृत । देवदत्त शास्त्री कृत हिन्दी टीकादि (१९८२) १५०—००

९ नारदसंहिता (ज्योतिष) । नारद महामुनि कृत । सान्वय, विमला हिन्दी व्याख्या. व्याख्याकार-राम जन्म मिश्र (१९८२) ६०—००

१० नाट्यशास्त्रम् (नाट्य) । भरतमुनि कृत । पं० बटुकनाथ शर्मा एवं बलदेव उपाध्याय संशोधित (१९८२) सम्पूर्ण १००—००

११ योगसूत्र । (योग) पतञ्जलि कृत । भोजराज कृत 'राजमार्तण्ड'-भावागणेश कृत 'प्रदीपिका'-नागोजि भट्ट कृत 'वृत्ति' रामानन्द यति कृत-'मणिप्रभा' अनन्त देव कृत 'चन्द्रिका' तथा सदाशिवेन्द्र सरस्वती कृत 'योगसुधाकर' छः टीका । विस्तृत हिन्दी भूमिका डा० महाप्रभुलाल गोस्वामी (१९८२) ५०—००

प्राप्तिस्थान—चौखम्बा संस्कृत संस्थान, पो. बा. ११३९ वाराणसी-१